ॐ

ॐ

ज्योतिर्विंत्केशवभट्ट — काशीनाथशर्माभ्यां

संस्कृता-शोधिता च

इयम्

सहस्रनामस्तोत्रयुक्ता

नित्यकर्म विधिः नं० २

ॐ

ईस्वीसं० १९४० सप्तर्षिसं० ५०१६

वैक्रमे १९९७

परोपकाराय प्राकाश्यं नीता

पुस्तक मिलनेका पता:- ज्यो० काशीनाथ (पुलाद)
टीचर हिन्दी विद्यालय नुन्दुपुरा सुथो श्रीनगर काश्मीर

मूल्यं ।≡)

हमारे क्रेयपुस्तक मिलनेका पत्ताः—

पं० केशवभट्ट ज्योतिषी पाठशालाटीचर, जिल्ला रैणावरी, महल्लाभाग ज्योगीलङ्कर कश्मीर — श्रीनगर.

नं० पुस्तकों की पृष्ठाङ्क और पंक्तिअङ्कसहित विषयसूची मूल्यम्

१ नित्यकर्मविधि नं० २ [प्रथमखण्ड में] पृष्ट १ पंक्ति १ से, काश्मीरिकत्रैवर्णाऽश्रमाचारशिक्षा, ५-१, जन्मोत्सवपूज्यदेवतापूजा ५-८, जन्माष्टमीपुजा ५-१९ जयनारायण ६-११, व्याप्तचराचर ७-१० अतिभीषण ८-३ बहुरूपगर्भोपयोगि (स्वच्छन्दध्यानं) त्रिपंचनयनं देवमित्यात्मकं (२ खण्ड में) १—१ स्नानविधि ७-१२ सन्ध्योपासना २०-६ नैवेद्यमंत्र २३-१६ भोजनविधि २५-४ पञ्चगव्यविधि २७-९ विष्णुपञ्चायतनपूजा ५५-१ गणेशस्तुति ५६-४ गुरुस्तुति ५७-८ गायत्रीलीला ५९-१ गौरीस्तुति ६०-३ मुकुन्दमालात्मकः ।-)

२ भवानीनामसहस्रस्तोत्रम् । ६५-१ नामसहस्र व नामावली ९४-१७ इन्द्राक्षीस्तोत्रात्मकम् । ।-)

३ विष्णुसहस्रनामस्तोत्रं (९७-१ नामावली ११३-१३ स्तोत्र १२६-६ गोविन्दाष्टक १२७-१० कृष्णलीला १२८-४ ‘विश्वेश्वराय’ शिवस्तोत्र ।-)

४ सहस्रनामावाली । १२९-१ राज्ञीसहस्रनाम १३८-२२ नामावली १५१-१ ज्वालासहस्रनाम १५९-१३ नामावली १६९-१४ शारिकासहस्रनाम १७३-९ नामावली १९०-१ गणेशसहस्रनामावली २०३-१ राज्ञीस्तोत्र २०४-२१ राज्ञीस्तुति २०५-२० ज्वालास्तोत्र २०७-१५ शारिकास्तोत्रात्मकम् ॥)

५ आदित्यहृदयम् (२०९-१ गणेशस्तोत्र । २१२-१ सरस्वतीस्तुति । २१४-१ राज्ञीकवच । २१६-१६ आदित्यहृदय । २३१-१ मातृभक्तिस्तुति । २३३-१ राज्ञीस्तोत्र । २३५-१ मातृदेवीलीलास्तुति । २३६-६ अपराजिताविद्या । ।)

६ शिवसूर्ययोः सहस्रनामावली (२४१-१ सूर्यसहस्रनामावली । २५०-८ शिवसहस्रनामावली । २५९-६ नरकोत्तारणस्तोत्र । २६१- नारायणकवच २६६-१२ पञ्चमुखहनुमत्कवच २७० -१ सूर्यकवच । ।)

७ चमानुवाकयम् । (३ खण्डं) १-१ चमानुवाक्य -)॥

८ शिवपूजा । (चतुर्थ खण्डं) १-१ बहुरूपगर्भस्तोत्र । ५-११ शिवकवच १३-१

Book No. न २१२७
Thaploo (Pvt.) Library

शिक्षा लौगाक्षिमुनिप्रणीता ॥

॥ अथ संक्षेपतस्त्रैवर्ण्यानामाह्निकं कर्म लिख्यते ॥

ब्राह्मे मुहूर्ते शयनतलादुत्थाय यथासम्भवं शुद्धिं विधायासने चोपविश्य सहस्रारे यथामूर्ति शशिवर्णं स्वं गुरुं ध्यात्वा स्तुत्वा च, तदुक्तरीत्या स्वेष्टदेवीं ध्यात्वा स्तुत्वा च, ब्राह्मं तेजो विधायिनीं गायत्रीं च ध्यात्वा स्तुत्वा, तत उत्थाय बहिराह्निकम् ॥ ॥

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः । आचारमग्निकार्यं च सन्ध्योपासनमेवच ॥ प्रतिश्रयाद्दक्षिणपश्चिमेन क्षिप्रं गत्वा क्षेपमात्रं शरस्य । कृत्वा पुरीषं च शिरोवगुण्ठ्य नतु स्पृशेज्जातु शिरः करेण ॥ शुष्कैस्तृणैर्वा काष्ठैर्वा पर्णैः पत्रदलेन वा । सुसंवृते प्रदेशे वा ह्यऽन्तर्धाय वसुन्धराम् ॥ ३ ॥ मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः । दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा ॥ ४ ॥ एकां लिङ्गे मृदं दद्याद्वामहस्ते तु मृत्त्रयम् । उभयोर्हस्तयोर्द्वे तु मूत्रशौचं प्रचक्षते ॥ ५ ॥ एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश । उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सिता ॥ ६ ॥ विप्रे गौरमृदः शौचे क्षत्रे रक्तास्तथैव च । हरिद्वर्णा वैश्ये तु कृष्णाः स्त्रीशूद्रयोः स्मृताः ॥ ७ ॥ नाहरेन्मृत्तिकां वप्रान्न कूलात्सैकतात्तथा । नाखुकृष्टान्न वल्मीकात्पांसुलान्न च कर्दमात् ॥ ८ ॥ न मार्गान्नोषराच्चैव शौचशिष्टां परस्य च । एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् । त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणम् ॥ ९ ॥ कृत्वा मूत्रपुरीषे च खान्याचान्त उपस्पृशेत् । दिवा-

शौचस्य रात्र्यर्धं पथि पादो विधीयते । आर्त्तः कुर्याद्यथाशक्ति स्वस्थः कुर्याद्यथोदितम् ॥ १० ॥ इति शौचशिक्षा ॥

उपनयनप्रभृति ब्रह्मचारी स्याः, मार्गवासाः स्याः, संहतकेशः स्याः, भैक्षाचर्यवृत्तिः स्याः, सशल्कदण्डः स्याः, सप्तमुञ्जां मेखलां धारयेः, न मधुमांसे अश्नीथाः, क्षारलवणवर्जी स्याः, आचार्यस्याऽप्रतिकूलः स्याः, सर्वकार्याऽस्वतन्त्रः स्याः, पूर्वोत्थायी स्याः, जघन्यसंवेशी स्याः, यत्त्वामुपेयात्तदस्मै दद्याः, बहूनां येन संयुक्तस्तदस्मै दद्याः, न प्रविभजेः, नास्य शय्यामाविशेः, न रथमारुहेः, न संवस्त्रयेथाः, सर्वाणि संस्पर्शकानि स्त्रीभिः सह वर्जयेः, न मुषितां प्रेक्षेः, न विहारार्थं जल्पेः, न रुच्यर्थं किञ्चन धारयेथाः, न स्नायाः, उदकं वाभ्युपेयाः, यदि स्नायाः, दण्ड इवाप्सु परिप्लवेथाः, मुण्डो भव, जटिलो भव, एकशिखी वा भव, सायंप्रातः सन्ध्यामुपासीथाः, तिष्ठेः पूर्वामासीथा उत्तराम्, "ॐभूर्भुवः स्वः" इत्युक्त्वा "ॐतत्सवितु" रिति सावित्रीमनुब्रूयाः, प्रागस्तमयान्निष्क्रम्य समिध आहरेः "हरिणीर्ब्रह्मवर्चसकाम" इतिश्रुतिः सायं प्रातः सन्ध्यानिःसरणं कर्तव्यं, भैक्षाचरणं कर्तव्यं, अग्नीन्धनं कर्तव्यं, सायमेवाग्निमिन्धीथा इत्येके । भैक्षस्याचरणे दोषः पावकस्यासमिन्धने । सप्तरात्रमकृत्वैतदवकीर्णिव्रतं चरेत् ॥ सप्तागारं चरेद्भैक्षं स्वकर्म परिकीर्तयन् । तेभ्यो लब्धेन भैक्षेण वर्तयेदेककालिकम् ॥ उपस्पर्शस्त्रिषवणमब्देन स विशुद्ध्यति ॥ कामावकीर्णोऽस्मि अवकीर्णोऽस्मि कामकामाय स्वाहा, कामाभिद्रुग्धोस्म्यऽभिद्रुग्धोऽस्मि कामकामाय स्वाहा ॥ इति ॥

ब्रह्मचार्यसि, अपोशान, कर्म कुरु, दिवा मा स्वाप्सीः, वाचं
यच्छ, मा मलवद्वाससोऽद्राक्षीः, मा सम्भाषयेथाः, मलवद्वा-
ससो भवन्ति, उदक्यासूतिकाश्वपाकाऽशुचयोऽन्त्यावसायिन
इति, न श्मशानं गच्छेः, न शवशरीरं पश्येः, अनातृणं शव-
शरीरं दृष्ट्वा त्रिरात्रमुपावसेः, न मधुमांसे प्राश्यालभ्य वा
शरीरं पुनर्व्रतमालभेथाः, यानि हविर्दूषणानि तानि भोजन-
दूषणानि, नोच्छिष्टं भुञ्जीथाः, नोच्छिष्टमन्यस्मै दद्याः, मा गुरु
भुञ्जीथाः, व्याधितविषयमेतत्, येनेच्छेत्तेन चिकित्सेत्,
"कामं गुरूच्छिष्टं भुञ्जीयादिति" ह्याचार्याः । न नक्तं भुञ्जीथाः,
उपज्वल्य वा भुञ्जीथाः, न मृन्मये भुञ्जीथाः, "न प्रतिस-
न्दद्या" इत्येके । स्थानासनं पर्वान्तेषूपवासः वाग्यमनं च,
कंचिदप्रयतं दृष्ट्वा प्राणायामैः स शुद्ध्यति, सन्दर्शने त्रयः
कार्याः, संव्याहृत्य तु सप्त, समासाद्य तु द्वादश, सर्वत्र ज्यो-
तिर्दर्शनमुदकोपस्पर्शनम्, "सूर्याचन्द्रमसौ गौरग्निर्ब्राह्मणः"
इत्येतानि पञ्च ज्योतींषि, एतेषामेकेनापि शुद्ध्यति, अवद्धं
मनो, दरिद्रं चक्षुः, सूर्यो ज्योतिषां श्रेष्ठो "दीक्षे! मा मा हिं-
सीः" इति सूर्यं दिवाऽग्निं रात्रौ, रेतसि स्कन्ने, पुनर्मा मैत्विन्द्रि-
यमिति जपेत् ॥ ॐपुनर्मा मैत्विन्द्रियं पुनरायुः पुनर्भगः, पुन-
र्ब्राह्मणमैतु मां पुनर्द्रविणमैतु माम् । यन्मेऽद्य रेतः पृथिवीमस्क-
न्यदोषधीरप्यसरद्यदपस्तदहं पुनरादधे । यन्मे रेतः प्रसिच्यते
यन्म आजायते पुनः, यद्वा मे प्रतितिष्ठति, तेन माममृतं कुरु,
तेन सुप्रजसं कुरु ॥ "ॐनमो ब्रह्मणे नमो अस्त्वग्नये॰" इति
त्रिः पठेत् । इति व्रतशिक्षा ॥

ॐ वैणवदण्डधारी स्याः, नित्यं छत्रधारी स्याः, अपन्थदायी स्याः, अदत्तहरणं प्रतिषिद्धम्, अपरया द्वारा निःसरणं प्र०, मलवद्वाससा सह सम्भाषा प्रतिषिद्धा, रजोवाससा सह शय्या प्र०, गुरोर्दुरुक्तवचनं प्रतिषिद्धम्, अस्थाने स्वयनं प्र०, सरणं प्र०, गायनं प्र०,नर्तनं प्र०, तस्य चेक्षणं प्र० ॥ वेदमनूच्यैकादशानुवाक्येनानुशास्ति, सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः, आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः, सत्यान्न प्रमदितव्यं, धर्मान्न प्र०, यत्नान्न प्र०, कुशलान्न प्र०, स्वाध्यायप्रवचनाभ्यां न प्र०, यज्ञाद्देवपितृकार्येभ्यो न प्रमदितव्यम्, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, यान्यऽनवद्यानि कर्माणि तानि त्वया कर्तव्यानि, नो इतराणि । अथ यान्यस्माकं सुचरितानि तानि त्वया कर्तव्यानि, नो इतराणि । अथ ये के चास्मच्छ्रेयांसो ब्राह्मणा आगच्छेरंस्तेषां त्वयाऽसनेन प्रश्रयितव्यम् । श्रद्धया देयमश्रद्धया देयम्, संविदा देयमसंविदा देयम्, ह्रियादेयं, भियादेयं, वित्यै देयमवित्यै देयम्भूत्यै देयमभूत्यैदेयम् । अथ यदि ते कर्मविचिकित्सा, वृत्तिविचिकित्सा वा स्यात्, ये तत्र ब्राह्मणाः सन्दर्शिनो युक्ता अयुक्ता अरूक्षा अलुब्धा धर्मकामा वा स्युः, यथा ते तत्र वर्तेरंस्तथा त्वं तत्र वर्तेथाः । एष आदेशः २। एष उपदेशः २। एषा वेदोपनिषत् २। एतदनुशासनम् २। एतदुपास्यम् २ इत्याचारशिक्षा ॥ इत्युक्तदिशाऽचरेत् ॥ काठगृह्ये त्वाचार्यलक्षणम् ॥ सत्यवाग्धृतिमान्दक्षः सर्वभूतदयापरः । आस्तिको वेदनिरतः शुचिराचार्य उच्यते ॥ अयमेवाचार्यः "उपनेता, गुरु," इत्यादिपर्यायैर्व्यवह्रियते ॥

॥ इति शिक्षा लौगाक्षिमुनिप्रक्लृप्ता ॥

अथ जन्मदिनपूज्याः षोडशोपचारैर्देवाः ॥ "अश्वत्थाम्ने
बलये व्यासाय हनुमते कृपाचार्याय मार्कण्डेयाय परशुरामाय
सप्तभ्यश्चिरजीविभ्यः प्रजापतिजन्मोत्सवदेवताभ्यः" इत्येता-
न्सम्पूज्य तिलगुडयुतं दधि पिबेत् ॥ तत्र मन्त्रः ॥ मार्कण्डेय नम-
स्तेस्तु सप्तकल्पान्तजीवन । आयुरारोग्यसिद्ध्यर्थं प्रसीद भगव-
न्मुने ॥ १ ॥ चिरजीवी यथा त्वं भोः श्रिया रूपेण सम्पदा ।
युक्तस्तथा कुरु त्वं मां त्वायुषा संयुतं मुने ॥ २ ॥ इति ॥

जन्माष्टमीदेवताः ॥ देवक्यै देव्यै यशोदायै रोहिण्यै
वसुदेवाय नन्दगोपाय बलभद्राय संकर्षणाय श्रीकृष्णाय गो-
पेभ्यः गोपीभ्यः गोपबालेभ्यः वृन्दावनवासिभ्यः कृष्णजन्मा-
ष्टमीपर्वदेवताभ्यः इति ॥ चन्द्रस्यार्घ्यदानमन्त्रः । क्षीरोदा-
र्णवसम्भूत ह्यत्रिनेत्रसमुद्भव । गृहाणार्घ्यं मया दत्तं रोहिणी-
सहितः शशी ॥ रोहिणीसहित चन्द्रमः इदं तेऽर्घ्यम् ॥ २ ॥
ध्यानं ॥ तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदार्युदायुधम् ।
श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीताम्बरं सान्द्रपयोदसौ-
भगम् ॥ १ ॥ महार्हवैडूर्यकिरीटकुण्डलत्विषा परिष्विक्तसहस्र-
कुन्तलम् । उद्दामकाञ्च्यङ्गदकङ्कणादिभिर्विरोचमानं वसुदेवजं
भजे ॥ २ ॥ समाप्तम् ॥

अथ विष्णोर्जयस्तुतिः ॥ चामरस्तुतिश्च ॥

ॐजय नारायण जय पुरुषोत्तम जय वामन कंसारे !
उद्धर मामसुरेशविनाशिन् पतितोहं संसारे । घोरं हर मम
नरकरिपो केशव कल्मषभारं मामनुकम्पय दीनमनाथं कुरु
भवसागरपारम् ॥ १ ॥ जय जय देव जयासुरसूदन जय

केशव जय विष्णो, जय लक्ष्मीमुखकमलमधुव्रत जय दश-
कन्धरजिष्णो । घोरं० ॥ २ ॥ त्वं जननी जनकः प्रभुर-
च्युत त्वं पुत्रसुहृद्धनमित्रं, त्वं शरणं शरणागतवत्सल त्वं
भवजलधिवहित्रम् । घोरं० ॥ ३ ॥ पुनरपि जननं पुनरपि
मरणं पुनरपि गर्भनिवासं, सोढुमलं पुनरस्मिन्माधव मामुद्धर
निजदासम् । घोरं० ॥ ४ ॥ जनकसुतापतिचरणपरायण-
शङ्करमुनिवरगीतं, धारय मनसि कृष्ण पुरुषोत्तम वारय संसृ-
तिभीतिम् ॥ घोरं० ॥ ५ ॥ यद्यपि सकलमहं कलयामि हरे
नहि किमपि ससत्वं, तदपि न मुञ्चति मामिदमच्युत पुत्रक-
लत्रममत्वम् ॥ घोरं० ॥ ६ ॥ इति विष्णोर्जयस्तुतिः ॥

अथ शिवचामरस्तुतिः ॥

ॐ व्याप्तचराचरभावविशेषं चिन्मयमेकमनन्तमनादिम् ।
भैरवनाथमनाथशरण्यं तन्मयचित्ततया हृदि वन्दे ॥ १ ॥
त्वन्मयमेतदशेषमिदानीं भाति मम त्वदनुग्रहशक्त्या । त्वं च
महेश सदैव ममात्मा स्वात्ममयं मम तेन समस्तम् ॥ २ ॥
स्वात्मनि विश्वगते त्वयि नाथे तेन न संसृतिभीतेः कथास्ति ।
सत्स्वपि दुर्धरदुःखविमोहत्रासविधायिषु कर्मगणेषु ॥ ३ ॥
अन्तक मां प्रति मा दृशमेनां क्रोधकरालतमां विदधीहि ।
शङ्करसेवनचिन्तनधीरो भीषणभैरवशक्तिमयोस्मि ॥ ४ ॥
इत्थमुपोद्भवन्मयसंविद्दीधितिदारितभूरितमिस्रः । मृत्युयमा-
न्तककर्मपिशाचैर्नाथ ! नमोस्तु न जातु बिभेमि ॥ ५ ॥
प्रोदितसत्यविबोधमरीचिप्रोक्षितविश्वपदार्थसतत्त्वः । भावप-
रामृतनिर्भरपूर्णे त्वय्यहमात्मनि निर्वृतिमेमि ॥ ६ ॥ मानस-

गोचरमेति यदैव क्लेशदशाऽतनुतापविधात्री । नाथ ! तदैव मम त्वदभेदस्तोत्रपरामृतवृष्टिरुदेति ॥ ७ ॥ शङ्कर सत्यमिदं व्रतदानस्नानतपो भवतापविनाशि । तावकशास्त्रपरामृतचिन्ता सिध्यति चेतसि निर्वृतिधाराः ॥ ८ ॥ नृत्यति गायति हृष्यति गाढं संविदियं मम भैरवनाथ । त्वां प्रियमाप्य सुदर्शनमेकं दुर्लभमन्यजनैः समयज्ञम् ॥ ९ ॥ वसुरसपौषे कृष्णदशम्यामभिनवगुप्तः स्तवमिममकरोत् । येन विभुर्भवमरुसन्तापं शमयति झटिति जनस्य दयालुः ॥ १० ॥ इति अभिनवगुप्ताचार्यकृता शिवचामरस्तुतिः (भैरवस्तुतिः) ॥

ॐ अतिभीषणकटुभाषणयमकिङ्करपटली, कृतताडनपरिपीडनमरणागमसमये । उमया सह मम चेतसि यमशासन निवसन् , शिवशङ्कर शिवशङ्कर हर मे हर दुरितम् ॥ १ ॥ अतिदुर्नयचटुलेन्द्रियरिपुसञ्चयदलिते, पविकर्कशकटुजल्पितखलगर्हणचलिते । शिवया सह मम चेतसि शशिशेखर निवसन् , शिव० ॥ २ ॥ भवभञ्जन सुररञ्जन खलवञ्चन पुरहन्, दनुजान्तक मदनान्तक रविजान्तक भगवन् । गिरिजावर करुणाकर परमेश्वर भयहन्, शिव० ॥ ३ ॥ शक्रशासन कृतशासन चतुराश्रमविषये कलिविग्रहभवदुर्ग्रहरिपुदुर्बलसमये । द्विजक्षत्रियवनिताशिशुदरकम्पितहृदये, शिव० ॥४॥ भवसम्भवविविधामयपरिपीडितवपुषं दयितात्मजममताभरकलुषीकृतहृदयम् । कुरु मां निजचरणार्चननिरतं भव सततं, शिवशङ्कर० ॥ ५ ॥ इति चामरार्थशिवस्तुतिः ॥

ॐ त्रिपञ्चनयनं देवं जटामुकुटमण्डितम् । चन्द्रकोटिप्रतीकाशं चन्द्रार्धकृतशेखरम् ॥ १ ॥ पञ्चवक्त्रं विशालाक्षं सर्पगोनासमण्डितम् । वृश्चिकैरग्निवर्णाभैर्हारेण तु विराजितम् ॥ २ ॥ कपालमालाभरणं खड्गखेटकधारिणम् । पाशाङ्कुशधरं देवं शरहस्तं पिनाकिनम् ॥ ३ ॥ वरदाऽभयहस्तं च मुण्डखट्वाङ्गधारिणम् । वीणाडमरुहस्तं च घण्टाहस्तं त्रिशूलिनम् ॥ ४ ॥ वज्रदण्डकृताटोपं परश्वायुधहस्तकम् । मुद्गरेण विचित्रेण धृतेन तु विराजितम् ॥ ५ ॥ सिंहचर्मपरीधानं गजचर्मोत्तरीयकम् । अष्टादशभुजं देवं नीलकण्ठं सुतेजसम् ॥ ६ ॥ ऊर्ध्ववक्त्रं महेशानि स्फटिकाभं विचिन्तयेत् । आपीतं पूर्ववक्त्रं तु नीलोत्पलदलप्रभम् ॥ ७ ॥ दक्षिणं तु विजानीयाद्वामं चैव विचिन्तयेत् । दाडिमीकुसुमप्रख्यं कुङ्कुमोदकसन्निभम् ॥ ८ ॥ चन्द्रार्बुदप्रतीकाशं पश्चिमं तु विचिन्तयेत् । स्वच्छन्दभैरवं देवं सर्वकामफलप्रदम् ॥ ९ ॥ ध्यायेद्वै यस्तु युक्तात्मा क्षिप्रं सिद्ध्यति मानवः । पूर्वं या सा मया ख्याता अघोरा शक्तिरुत्तमा ॥ १० ॥ यादृशं भैरवं रूपं तस्यास्तादृशमेव हि । भैरवं पूजयित्वा तु तस्योत्सङ्गगतां स्मरेत् ॥ ११ ॥ ईषत्करालवदनां गम्भीरविपुलस्वनाम् । प्रसन्नास्यां सदा ध्यायेत् भैरवीं विस्मितेक्षणाम् ॥ १२ ॥ नौम्यहं तां परब्रह्ममहिषीं चित्स्वरूपिणीम् । चराचरस्वरूपेण संस्थितां भक्तवत्सलाम् ॥ १३ ॥ ॥ इति बहुरूपगर्भस्तोत्रध्यानं द्वितीयम् ॥

नित्यकर्मविधिः ।

अथ स्नानविधिः ।

श्रीगणेशाय नमः । अथ मृत्खननमन्त्रः ॥ (मिट्टी खोदना ।) आक्रम्य वाजिन् पृथिवीमग्निमिच्छा रुचात्वम् । भूम्या वृत्वायनो ब्रूहि, यतः खनेम ते वयम् ॥ अथ दन्तधावनम् ॥ (दातन करना ।) आयुर्बलं यशो वर्चः प्रजाश्वतिवसूनि च । ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ अथ हस्तप्रक्षालनम् ॥ (हाथ धोना ।) यो विश्वचक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहुभ्यां धमते संपतत्रैर्द्यावापृथिवी जनयन्देव एकः ॥ अथ वामपादप्रक्षालनम् । (बाहे पैर धोना ।) नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ अथ दक्षिणपादप्रक्षालनम् ॥ (दाहे पैर धोना ।) नमः कमलनाभाय नमस्ते जलशायिने । नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ॥ अथ मुखप्रक्षालनम् ॥ (मुंह धोना ।) गङ्गाप्रयागगयनैमिषपुष्करादितीर्थानि यानि भुवि सन्ति हरिप्रसादात् । आयान्तु तानि करपद्मपुटे मदीये प्रक्षालयन्तु वदनस्य निशाकलङ्कम् ॥ तीर्थे स्नेयं तीर्थमेव समानानां भवति मा नः । शंस्यो अररुषो धूर्तिः प्रणङ्मर्त्यस्य रक्षाणो ब्रह्मणस्पते ॥ अथ यज्ञसूत्रप्रक्षालनम् । (जनू धोना ।) ॐ गायत्र्यै नमः

ॐभूर्भुवःस्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ३ ॥ (गायत्रीमंत्र से ही शिखा भी धोना ।) गायत्र्यैव शिखामाबद्ध्य ॥ अथ यज्ञसूत्रधारणम् ॥ (यज्ञसूत्र गले में पाना) ॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं, यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि, यज्ञस्य त्वा, उपवीतेन उपनह्यामि ॥ अथाचमनम् ॥ (अब आचमनकी विधान ।) [1]कृत्वाऽलं पादशौचं [2]विमलमऽथ जलं [3]त्रिःपिबेदुन्मृजेद्विस्[4]तर्जन्यऽङ्गुष्ठकाभ्यां सजलमऽभिमृशेन्नासिकारन्ध्रयुग्मम् । [5]अङ्गुष्ठानामिकाभ्यां नयनयुगलकं कर्णयुग्मं [6]कनिष्ठाङ्गुष्ठाभ्यां [7]नाभिदेशं हृदयमऽथ तलेनाऽ[8]ङ्गुलीभिः शिरोंसौ ॥ अथ प्राणायामः । ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं ॐतत्सवितुर्वरेण्यं भर्गो देवस्य

---

१ अच्छीतरह पैर धोकर. २ फिर सफा पानी. ३ तीनवार पीकर और दोवार वाहेतरफ सूंगलेकर छोडना. ४ वाहे हाथके बीच में रखे हुई पानी तर्जनी और अंगूठ से दोनो नथ्नों को मलना. ५ अंगूठ और अनामिका से दो आंखों को मलना. ६ कनिष्ठा और अंगूठ से दो कानों को. ७ फिर नाभिस्थान और हृदय को हथेली से. ८ सब अङ्गुलियोंसे सिर और कन्दों को मलना ॥ ९ इह मन्त्र एकवार पडते पडते नाभिस्थान पर रक्तवर्ण ब्रह्मा के ध्यान समेत "पूरक" याने अंगूठ से दाहे नथन वान्ध के वाहे नथन से आहस्ता आहस्ता प्राण चडावना ॥ और दो बार पडते २ हृदयपर कृष्णवर्ण विष्णु के ध्यान समेत "कुम्भक" याने मा भाकय अङ्गुलियों से वाहे नथन भी वान्ध के प्राण बन्ध रखना ॥ और तीन बार पडते २ माथे पर श्वेतवर्ण शिव के ध्यान समेत "रेचक" याने अंगूठ उठाकर दाहे नथन से शनैः २ प्राण छोडना ॥ इह प्राणायाम की विधि है ।

धीमहि, धियो यो नः प्रचोदयात् ॐ आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवःस्वरोम् ॥ अथ नमस्कारः । (अब नमस्कार करना ।) ब्रह्मणोऽग्न्यादयः नमो अग्नये अप्सुषदे नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽपांपतये नमोऽद्भ्यः । अथोपस्थानम् । (उपस्थान करना) अवभृथे त्रिष्टुब्वरुणः । उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ । अपदे पादा प्रतिधातवे करुतापवक्ता हृदयाविधश्चित् । अथ जलं त्रिरावर्तयेत् (हाथों से पानी में तीनवार मण्डलकरना ।) "यमस्य राज्ञो जगती वरुणः" । ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो देवः सविता बृहस्पतिर्विश्वेदेवा मरुतो मुञ्चन्तु स्वर्काः ॥ अथ वामभागे जलाञ्जलित्रयं क्षिपेत् । [बाहे तरफ तीन जलाञ्जलि छोडना ।] निचाङ्कुणस्य शुनःशेफस्य चापः । सुमित्रियान आपः ओषधयो भवन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ अथ नमस्कारः (नमस्कार करना ।) यत्किंचेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि । अचित्ते यत्तव धर्माय योऽपि स मा नस्तस्मादेनसो देव रीरिषः । अथ मृदो भागत्रयं कृत्वा, प्रथमभागेऽङ्गुष्ठेन जलसेचनम् । [अब मिट्टीका तीन भाग करके पहले भाग पर पानी अंगूट से छोडना ।] ॐभूर्भुवःस्वस्तत्सवितुर्वरेण्यं० ३ । अथ द्वितीयभागे जलसेचनम् । (दूसरे भागपर ।) "त्रितस्य महापाङ्क्तिरादित्याः" । आदित्या अव हि ख्याता दिकूलाद्दिवस्पृशः सुतीर्थाः सर्वतो यथा । नुन्नोनेषया सुगमनेहसो वऊतयः सुऊतयो वऊतयः । अथ तृतीयभागे जलसे-

चनम् । (तीसरे भागपर पानी छोडना ।) "मेधातिथेर्गायत्रं विष्णुः" । अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभिः ॥ अथ तृतीयांशमृदो भागचतुष्कं विधाय चतुर्दिक्षु क्षिपेत् । प्रथमं पूर्वे । (अब तीसरें भाग को और चार भाग करके, चार दिशाओं को नदी में छोडना । प्रथम पूर्वदिशा से छोडनां ।) "भर्गस्य बृहती इन्द्रः" । यत इन्द्र भयामहे ततो नो अभयङ्कृधि । मघवञ्छग्धि तव तन्न ऊतिभिर्विद्विषो विमृधो जहि । अथ दक्षिणे । (अब दखन से ।) "शासस्याऽनुष्टुभौ विमृध इन्द्रः" । स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नः सोमपा अभयङ्करः । अथ पश्चिमे । (पश्चिम से ।) विरक्षो विमृधो जहि विवृत्रस्य हनूरुज । विमन्युमिन्द्र वृत्रहन्नऽमित्रस्याभिदासतः । अथोत्तरे । (उत्तर से ।) "वसुक्रस्य त्रिष्टुविन्द्रः" । इदं सुमे जरितरः चिकिद्धि प्रतीपं शापं नद्यो वहन्ति लोपाशाः सिंहं प्रत्यञ्चमत्स्याः क्रोष्टा वराहान्निरतत्थ कक्ष्यात् । अथ द्वितीयमृदा जलालोडितया नाभेरूर्ध्वं विशोधयेत् । (दूसरी मिट्टी पानीमें मल कर नाभिस्थान के उपर मलना ।) "यज्ञस्याऽनुष्टुप् मृत्तिका ।" अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । उद्धृतासि वराहेण कृष्णेन शतबाहुना । मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च । मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता । मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् । वाचा कृतं कर्मकृतं मनसा यत्तु चिन्तितम् । मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् । त्वया हतेन पापेन ब्रह्म-

लोकं व्रजाम्यऽहम् ॥ (अब प्रथमांश को चार भाग करके । पहला भाग माथे को मलना ।) "कुत्सस्य रुद्रो जगती" । मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते । अथ द्वितीयांशेन । (द्वितीय भागसे ।) ओंभूः ॐ-भुवः ॐस्वः । इति वामांसे । (इति बाहे कन्दे पर मलना ।) ॐमहः ॐजनः ॐतपः । इति दक्षिणांसे (इति दाहे कन्दे पर ।) ॐसत्यं इति हृदयेऽनुलिप्य । (इति छाते को मलना ।) अथ गोमयाम्भसा । (गोआ सहित पानी शरीरको मलना ।) अग्रमग्रं चरन्तीनामोषधीनां रसं वने । तासामृषभपत्नीनां पवित्रं कायशोधनम् ॥ त्वं मे रोगं च शोकं च पापं च नुद गोमय ॥ अथापमार्गेणाङ्गमङ्गमुपस्पृशेत् । (अपामार्ग हर एक अङ्ग को मलना ।) "सिन्धुद्वीपस्यानुष्टुप् अपामार्गः" अपाघमपकिल्विषमपकृत्यमपोरपः । अपामार्ग त्वमस्माकमप-दुःस्वप्न्यं सुव । अथ दूर्वया (हमील शरीर को मलना ।) "प्रजा-पतेरनुष्टुप् दूर्वा" ॥ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च । या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यै ते देवीष्टके विधेम हविषा वयम् ॥ अथ दर्भाङ्कुरेण । (कुशाग्र शरीर को मलना ।) विरिञ्चिना सहोत्पन्न परमेष्ठिनिसर्गज । नुद पापानि सर्वाणि भव स्वस्तिकरो मम ॥ अथ नमस्कृत्य तीर्थान्स्मरेत् । (नमस्कार करके तीर्थोंका स्मरण करना ।) तीर्थस्यावाहनं कुर्यात्तत्प्रवक्ष्याम्यऽनन्तरम् । कुरुक्षेत्रं गया गंगा प्रभासं पुष्कराणि च ॥ तीर्थान्येतानि सर्वाणि स्नान-

काले भवन्तु मे। प्रपद्ये वरुणं देवमम्भसां पतिमूर्जितम्। याचितं देहि मे तीर्थं सर्वपापापनुत्तये। रुद्रान्प्रपद्ये वरदान्सर्वानऽप्सुषदस्त्वहम्। सर्वानऽप्सुषदश्चैव प्रपद्ये प्रणतः स्थितः। देवमऽप्सुषदं वह्निं प्रपद्येऽघनिसूदनम्। आपः पुण्याः पवित्राश्च प्रपद्ये शरणं तथा। रुद्राश्चाग्निश्च सर्पाश्च वरुणस्त्वाप एवच। शमयन्त्वाशु मे पापं पुनन्त्वेते सदा मम। इत्येवमुक्त्वा कर्तव्यं ततः संमार्जनं जले। अथ जलाञ्जलिं तृतीयांशमृत्सहितं गृहीत्वा प्रवाहान्तः क्षिपेत्। (अब तीसरा मिट्टी भाग पानी की अञ्जली में रखके संकल्प करके नदी में छोडना।) अपां पतये विद्महे पाशपाणये धीमहि, तन्नो वरुणः प्रचोदयात् ३॥ ॐ तत्सद्ब्रह्माऽद्यतावत्तिथावद्याऽमुकमासस्यामुकपक्षस्य तिथावऽमुकायामाऽत्मनो वाङ्मनःकायोपार्जितपापनिवारणर्थं श्रीविष्णुप्रीत्यर्थममुकनद्याः प्रवाहे स्नानमऽहं करिष्ये ॐकुरुष्व। अथ शिरसि जलमञ्जलिना क्षिपेत्। [सिर को अञ्जलीसे पानी फींकना।] ॐतद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम्॥ अथ शिरोमार्जयेत्। (सिर को छिटकाना।) ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यम्। अथोपस्थानम्। (उपस्थान करना।) ॐ हंसः शुचिषद्वसुरऽन्तरिक्षसद्धोता वेदिषदऽतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदऽब्जा गोजा ऋतजा अद्रिजा ऋतम्। अथ तर्पणम्। (पानी छोडना।) ॐनमो देवेभ्यः। (गले में यज्ञसूत्र रख के।) कण्ठोपवीती। स्वाहा ऋषिभ्यः (बाहे तरफ यज्ञसूत्र

रख के।) अपसव्येन। स्वधा पितृभ्यः (दाहे तरफ यज्ञसूत्र रख के।) सव्येन। आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरं जगत्तृप्यतु तृप्यतु तृप्यतु एवमस्तु। अथ परिशिष्टमृदा तिलकं कार्यम्। (चौथमा भाग से तिलक करना।) यत्त्वगऽस्थिगतं पापं जन्मान्तरकृतं च यत्। तन्मे हरस्व कल्याणि मूर्ध्नि स्पर्शेन वैष्णवि। अथ वस्त्रधारणम्। (वस्त्र पहनना।) युवा सुवासाः परिवीत आगात्स उच्छ्रेयान्भवति जायमानः। तन्धीरासः कवय उन्नयन्ति साध्यो मनसा देवयन्तः। अथ स्नानपट्टपीडनम्। (लंगूठी निचौडना।) अस्मत्कुले तु ये जाता अपुत्रा गोत्रवर्जिताः। ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम्॥ इति स्नानविधिः॥

अथ सन्ध्योपासना।

अथ नमस्कारः। (नमस्कार करना।) श्रीमहागायत्र्यै नमः सावित्र्यै नमः सरस्वत्यै नमः॥ ॐप्रणवस्य ऋषिर्ब्रह्मा, गायत्रं छन्द एव च। देवोऽग्निर्व्याहृतिषुच, विनियोगः प्रकीर्तितः॥ प्रजापतेर्व्याहृतयः, पूर्वस्य परमेष्ठिनः। व्यस्ताश्चैव समस्ताश्च, ब्राह्ममक्षरमोमिति॥ व्याहृतीनां समस्तानां, दैवतं तु प्रजापतिः। व्यस्तानामयमग्निश्च, वायुः सूर्यश्च देवताः॥ छन्दश्च व्याहृतीनामेकाक्षराणामुक्ताख्यं, त्र्यक्षराणामऽत्युक्ताख्यम्। विश्वामित्र ऋषिश्छन्दो, गायत्रं सविता तथा॥ देवतोपनये जप्ये, गायत्र्या योग उच्यते। आवाहयामि गायत्रीं, सर्वपापप्रणाशिनीम्॥ न गायत्र्याः परं जप्यं, न व्याहृतिसमं हुतम्। आगच्छ वरदे देवि, जप्ये मे

सन्निधौ भव ॥ गायन्तं त्रायसे यस्माद्गायत्री त्वं ततः स्मृता । अग्निर्वायुश्च सूर्यश्च बृहस्पत्याप एव च ॥ इन्द्रश्च विश्वेदेवाश्च देवताः समुदाहृताः । एवमार्षं छन्दो दैवतं, विनियोगं चाऽनुस्मृत्य ॥ गायत्र्या शिखामाऽबद्ध्य, गायत्र्यैव समन्ततः । आत्मनश्चापः परिक्षिप्य, प्राणायामं कुर्यात् ॥ अथाञ्जलिं कृत्वा । (अपने आपको छिडके अञ्जलि करना ।) ओजोऽसीति गायत्रीमावाह्य देवानामार्षम् । ओजोऽसि सहोऽसि बलमऽसि भ्राजोऽसि देवानां धाम नामासि । विश्वमऽसि विश्वायुः सर्वमऽसि सर्वायुरभिभूः । अथ प्राणायामः । (प्राणायाम का मंत्र ।) ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं ॐतत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात् ॐआपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवःस्वरोम् । अथ सायमाचमनत्रयम् । (सायं की तीन आचमन करना ।) ॐअग्निश्च मा मन्युश्च, मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यदऽह्ना पापमकार्षं, मनसा वाचा हस्ताभ्यां, पद्भ्यामुदरेण शिश्ना । अहस्तदऽवलुम्पतु, यत्किंचिद्दुरितं मयीदमहमापोमृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥ प्रातराचमनत्रयम् । (प्रातः की तीन आचमन ।) ॐसूर्यश्च मा मन्युश्च, मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यद्रात्र्या पापमकार्षं, मनसा वाचा हस्ताभ्यां, पद्भ्यामुदरेण शिश्ना । रात्रिस्तदऽवलुम्पतु, यत्किंचिद्दुरितं मयीदमऽहमापोऽमृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ अथ मध्याह्ने आचमनत्रयम् । (मध्याह्न की तीन आचमन ।) ॐआपः पुनन्तु

पृथिवीं, पृथिवी पूता पुनातु माम् । पुनातु ब्रह्मणस्पतिर्ब्रह्म पूतं पुनातु माम् ॥ यदुच्छिष्टमऽभोज्यं वा, यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं जुहोमि स्वाहा अथ मार्जनमंत्रः । आपो[1] हिष्ठा मयोभुवस्ता[2] न ऊर्जे दधात-न महे[3] रणाय चक्षसे ॥ यो[4] वः शिवतमो रसस्तस्य[5] भाजयते हनः । उशतीरिव[6] मातरः ॥ तस्मा[7] अरंगमाम वो, यस्य[8] क्षयाय जिन्वथ । आपो[9] जनयथा च नः ॥ (छाते और सिरको फी मंत्र से छडकना ।) हिरण्यवर्णाः शुचयः पावका, यासु जातः कश्यपो यास्विन्द्रः । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शंस्योना भवन्तु ॥ १ ॥ ॐयासां देवा दिवि कृण्वंति भक्ष्यं, या अन्तरिक्षे बहुधा भवन्ति । या० ॥ २ ॥ ॐयासां राजा वरुणो याति मध्ये, सत्याऽनृते अवपश्यञ्जनानाम् । या० ॥३॥ ॐशिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे । मधुश्च्युतः शुचयो याः पावकास्ता न आपः शंस्योना भवन्तु ॥ ४ ॥ ॐशन्नो देवीरऽभीष्टय आपो भवन्तु पीतये, शंय्योरभिस्रवन्तु नः ॥ ५ ॥ ॐशन्न आपो धन्वन्याः, शन्नः सन्त्वऽनूप्याः । शन्नः समुद्रिया न आपः शमुनः सन्तु कूप्याः ॥६॥ आपो अस्मान्मातरः शुन्धयन्तु घृतेन मा घृतपाः पुनन्तु । विश्वं हि रिप्रं प्रवहन्तु देवीरुदिदाभ्यः शुचिरापूत एमि ॥ ७ ॥ इदमापः प्रवहत यत्किञ्चिद्दुरितं मयि । यद्वा-हमभिदद्रोह यद्वा शेप उतानृतम् ॥८॥ मुञ्चन्तु मा शपथ्या-

---

१ छाते को छिडकना. २ परों को. ३ सिर को. ४ छाते को. ५ पैरों को. ६ सिर को. ७ सिर को. ८ छाते को. ९ पैरों को.

दऽथो वारुण्यादुत । अथो यमस्य पड्वीशात्सर्वस्माद्देव किल्बि-
षात् ॥९॥ यज्जाग्रद्यत्स्वप्नः पापमभिजगाम । सर्वस्मान्मा तस्मा-
देनसः प्रमुञ्चतु ॥ १० ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य
वाजिनः । सुरभि नो मुखाकरत्प्रण आयूंषि तारिषत् ॥ अथ
वामभागे जलाञ्जलित्रयं क्षिपेत् । (बाहे तरफ तीन जलाञ्जलि
सूँग के छोडना ।) ॐद्रुपदादिवोन्मुमुचानः, स्विन्नः स्नात्वी
मलादिव । पूतं पवित्रेणेवाऽज्यमापः शुन्धन्तु मैनसः ।
अथ जलं त्रिरावर्तयेत् । (पानी में दोनो हाथों से तीन आवर्तन
करना ।) ॐऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो
रात्रिरजायत, ततः समुद्रो अर्णवः ॥ समुद्रादऽर्णवादऽधि,
संवत्सरो अजायत । अहोरात्राणि व्यदधद्विश्वस्य मिषतो वशी ॥
सूर्याचन्द्रमसौ धाता, यथापूर्वमऽकल्पयत् । दिवं च पृथिवीं,
चान्तरिक्षमथो स्वः । अथ शिरसि मार्जयेत् । (सिरको
छिडकना।) ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐस-
त्यम् । अथाचमनत्रयम् । (तीन आचमन करना।) ॐ अन्त-
श्चरसि भूतेषु, गुहायां विश्वतो मुखः । त्वं यज्ञस्त्वं वषट्कार,
आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् । ततः प्राणायामः ॥
अथ सूर्याभिमुखो गायत्र्याभिमन्त्रितांस्त्रीञ्जलाञ्जलीनुत्क्षिप्य-
क्षिपेत् । (प्राणायाम करके सूर्यके संमुख गायत्रीके मन्त्रसे प्रदक्षिण
करके तीन जलाञ्जलि उपर छोडना ।) ॐभूर्भुवःस्वस्तत्सवितु० ३॥
अथोपस्थानम् । (उपस्थान करना।) ॐउद्वयन्तमसस्परि, ज्यो-
तिष्पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमऽगन्म ज्योतिरुत्तमम् ॥
ॐउदुत्यं जातवेदसं, देवं वहन्ति केतवः । दृशे विश्वाय

सूर्यम् ॥ ॐचित्रन्देवानामुदगादनीकं, चक्षुर्मित्रस्य वरुणस्याऽग्नेः । आ प्रा द्यावापृथिवी अन्तरिक्षं, सूर्य आत्मा जगतस्तस्थुषश्च ॥ ॐतच्चक्षुर्देवहितं, पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं, जीवेम शरदः शतम् ॥ ॐहंसः शुचिषद्वसुरऽन्तरिक्षसद्धोता वेदिषदऽतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदऽब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥ ॐविभ्राड्बृहत्पिबतु, सोम्यं मध्वायुर्दधद्यज्ञपता अविह्रुतम् । वात जूतयो अभिरक्षत्यात्मना, प्रजाः पिपर्ति बहुधा विराजति ॥ अथ विष्णुं ध्यायन्पुरुषसूक्तं पठेत् । (विष्णु का ध्यान करना ।) ॐ आनुष्टुभस्य सूक्तस्य, त्रिष्टुबऽन्तस्य देवता । विश्वात्मा पुरुषः साक्षाद्दपिर्नारायणः स्मृतः ॥ "ॐपुरुषमेधाः पुरुषस्य नारायणस्यार्षम् ॥" ॐसहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगुलम् । पुरुष एवेदं सर्वं, यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानो, यदऽन्नेनातिरोहति ॥ एतावानऽस्य महिमाऽतो ज्यायांश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादऽस्यामृतं दिवि ॥ त्रिपादूर्ध्व उदैत्पुरुषः, पादोऽस्येहाभवत्पुनः । ततो विश्वं व्यक्रामत्साशनाऽनशने अभि ॥ तस्माद्विराडऽजायत विराजो अधिपूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमऽथो पुरः ॥ यत्पुरुषेण हविषा देवा यज्ञमऽतन्वत । वसन्तो अस्यासीदाज्यं, ग्रीष्म इध्मः शरद्धविः ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजन्त, साध्या ऋषयश्च ये ॥ तस्माद्यज्ञात्सर्वहुतः, संभृतं पृषदाज्यम् । पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्यांश्च ये ॥ तस्माद्यज्ञात्सर्वहुत

ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्माद-ऽजायत ॥ तस्मादऽश्वा अजायन्त, ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ यत्पुरुषं व्यदधुः, कतिधा व्यकल्पयन् । मुखं किमऽस्य कौ बाहू, का ऊरू पादा उच्येते ॥ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदऽस्य यद्वैश्यः, पद्भ्यां शूद्रो अजायत ॥ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च, प्राणाद्वायुर-ऽजायत ॥ नाभ्या आसीदऽन्तरिक्षं, शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानऽकल्पयन् ॥ सप्तास्या-सन्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना, अबध्नन्पुरुषं पशुम् ॥ यज्ञेन यज्ञमऽयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त, यत्र पूर्वे साध्याः सन्ति देवाः ॥ (संहारमुद्रा करके शिवका ध्यान करना।) "ब्रह्मणस्त्रिष्टुप्मनः"। ॐ यज्जाग्रतो दूरमुदेति दैवं, तदु सुप्तस्य तथैवेति । दूरंगमं ज्योतिषां ज्योतिरेकं, तन्मे मनः शिवसंकल्पमस्तु ॥ येन कर्माण्यऽपसो मनीषिणो, यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वं यक्षमऽन्तः प्रजानां, तन्मे० ॥ यत्प्रज्ञानमुत चेतो धृतिश्च, यज्ज्योतिरन्तरमृतं प्र-जासु। यस्मान्न ऋते किञ्चन कर्म क्रियते, तन्मे० ॥ येनेदं भूतं भवनं भविष्यत्परिगृहीतमऽमृतेन सर्वम् । येन यज्ञस्तायते सप्तहोता, तन्मे० ॥ यस्मिन्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः । यस्मिंश्चित्तं सर्वमोतं प्रजानां, तन्मे० ॥ सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।

हृत्प्रतिष्ठं यदऽजरं यविष्ठं, तन्मे० ॥ (उपस्थान करना ।) अथ य एष एतस्मिन्मण्डले, पुरुषो यश्चैष हिरण्मयः पुरुषः । अथ य एष एतस्मिन्मण्डले, पुरुषोऽयमेव सोयं दक्षिणेऽक्षन्पुरुषः ॥ "शुक्रियं रुद्रस्य" । य उदगात्पुरस्तान्महतो अर्णवाद्विभ्राजमानः सरिरस्य मध्ये । स मामृषभो रोहिताक्षः, सूर्यो विपश्चिन्मनसा पुनातु । यद्ब्रह्माऽवादिष्म तन्मा मा हिंसीत्सूर्याय विभ्राजाय वै नमो नमः ॥ (न्यास करना ।) अ नाभौ । उ हृदि । म शिरसि ॥ भूः पादयोः । भुवः हृदि । स्वः शिरसि ॥ ॐभूः अङ्गुष्ठाभ्यां नमः । भुवः तर्जनीभ्यां नमः । स्वः मध्यमाभ्यां नमः । महः अनामिकाभ्यां नमः । जनः कनिष्ठिकाभ्यां नमः । तपः सत्यं करतलकरपृष्ठाभ्यां नमः ॥ भूः पादयोः । भुवः जान्वोः । स्वः गुह्ये । महः नाभौ । जनः हृदि । तपः कण्ठे । सत्यं शिरसि ॥ ॐभूः हृदयाय नमः । भुवः शिरसे स्वाहा । स्वः शिखायै वषट् । महः कवचाय हुँ । जनः नेत्राभ्यां वौषट् । तपः सत्यमऽस्त्राय फट् ॥ तत्सवितुरङ्गुष्ठाभ्यां नमः । वरेण्यं तर्जनीभ्यां नमः । भर्गो देवस्य मध्यमाभ्यां नमः । धीमहि अनामिकाभ्यां नमः । धियो योनः कनिष्ठिकाभ्यां नमः ॥ प्रचोदयात् करतलकरपृष्ठाभ्यां नमः ॥ तत्पादयोः । सवितुर्जान्वोः । वरेण्यं कट्यां । भर्गो नाभौ । देवस्य हृदये । धीमहि कण्ठे । धियो नासिकायां । यश्चक्षुषे । नः ललाटे। प्रचोदयात् शिरसि ॥ तत्सवितुर्हृदयाय नमः । वरेण्यं शिरसे स्वाहा । भर्गो देवस्य शिखायै वषट् । धीमहि कवचाय हुँ । धियो योनः नेत्राभ्यां वौषट् ।

प्रचोदयादऽस्त्राय फट् ॥ ॐआपःस्तनयोः । ज्योतिर्नेत्रयोः । रसो मुखे । अमृतं ललाटे । ब्रह्मभूर्भुवः स्वरों शिरसि ॥ (मुद्रा करना ।) तत्समाय नमः । स संपुटाय नमः । वि विततास नमः । तुर्विस्तीर्णाय नमः । व द्विमुखाय नमः । रे त्रिमुखाय नमः । ण्य चतुर्मुखाय नमः । अं पंचमुखाय नमः । भ षण्मुखाय नमः । र्गो अधोमुखाय नमः । दे व्यापकाञ्जलये नमः । व शकटाय नमः । स्य यमपाशाय नमः । धी ग्रन्थिकायै नमः । म संमुखोन्मुखाय नमः । हि विलम्बाय नमः । धी मुष्टिकायै नमः । यो मीनाय नमः । यो कूर्माय नमः । नः वराहाय नमः । प्र सिंहाक्रान्ताय नमः । चो महाक्रान्ताय नमः । द मुद्गराय नमः । यात्पल्लवाय नमः ॥ (प्राणायाम करके संकल्प छोडना ।) अस्यश्री महागायत्रीशापोद्धारमन्त्रस्य विश्वामित्र ऋषिः, विष्टारपंक्तिगायत्रं छन्दः, सविता देवता शापोद्धारे विनियोगः ॥ ॐब्रह्मणाग्निः संविदानो रक्षोहा बाधितामितः । अमीवायस्ते गर्भं दुर्नामा योनिमाशये १० "इति ऋग्वेदे" हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १० "इति यजुर्वेदे" ॐ आवायव्य यावायव्या यान्योर्वायायवः ॐ हरोसि पाप्मानं मे विद्धि १० "इति सामवेदे" सुभद्रा पावनी सुधा गायत्री विश्वभेषजम् । विशापामेनां कृत्वा यथास्तं विपरीतन १० "इति अथर्ववेदे" । तत्सवितुरिति मन्त्रस्य, विश्वामित्र ऋषिः, गायत्रं छंदः, सविता देवता, आत्मनो वाङ्मनः-

---

१ संकल्प से पानी छोडना.

कायोपार्जितपापनिवारणार्थं नित्यकर्मनिमित्तं चतुर्वर्गसिद्ध्यर्थे जपे विनियोगः ॥ [1]मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां, तत्त्वात्मवर्णात्मिकाम् । गायत्रीं वरदाभयाङ्कुशकरां, शूलं कपालं गुणं शङ्खं चक्रमथारविन्दुयुगलं हस्तैर्वहन्तीं भजे ॥ [2]ॐदुर्निवारभवध्वान्तध्वंसनैककृतेक्षणाम् । नौमि मोहविनाशाय भीतो ब्रह्मादिदेवताम् ॥ १ ॥ दुर्गतिं हर मे देवि बहुजन्मशतार्जिताम् । प्राप्य कल्पतरुच्छायां कथं सन्तप्यते जनैः ॥ २ ॥ पश्य मामाऽशु गायत्रि विभ्यतं स्निग्धचक्षुषा । न बालमऽवलं पुत्रं मुञ्चत्यग्रगमऽम्बिका ॥ ३ ॥ एहि मां पाणिपद्मेन देहि तूर्णं वरं शुभम् । महामोहाकुलं दीनमेहि मां स्पर्श नित्यशः ॥ ४ ॥ मातः प्रतीक्षते नाऽर्तो यत्तदाशु प्रसीद मे । हित्वाऽक्षसूत्रं सावित्रि निर्विघ्नं पश्य मामिह ॥ ५ ॥ शृण्वतो नाऽन्यकृत्यं स्यात्तत्त्वं परहितं कुरु । ब्रह्मविष्णुहराद्यास्त्वामाऽश्रयन्ति सुरेश्वरि ॥६॥ आगच्छ वरदे देवि, त्र्यक्षरे ब्रह्मवादिनि । गायत्रि च्छन्दसां मातर्ब्रह्मयोने नमोऽस्तु ते ३ ॥ [3]ओंकारं पूर्वमुच्चार्य व्याहृतीस्तदनन्तरम् । गायत्रीं प्रणवं चान्ते जप एवमुदाहृतम् । [4]ॐभूर्भुवः स्वस्तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयादों १०८ ॥ [5]सुरभिर्ज्ञानचक्रे च योनिः कूर्मोथ पङ्कजम् । लिङ्गं निर्याणकं चैव ह्यष्टौ मुद्राः प्रकीर्तिताः ॥ [6]दशभिर्जन्मचरितं, शतेन च पुरा कृतम् । त्रियुगोत्थं सहस्रेण, गायत्री हन्ति

---

१ महागायत्री का ध्यान करना. २ प्रार्थना करना. ३ मूलमन्त्र का उद्धार. ४ मूलमंत्र. ५ आठ मुद्रा दिखाना. ६ प्राणायाम करके तर्पण करना.

किल्विषम् ॥ देवा गातु ओत्रियाः, । देवा गातुविदो, गातुं विता गातुमित मनसस्पत इमं देवयज्ञं स्वाहा, वाचे स्वाहा वाते धाः ॥ ॐ [1]नमः प्राच्यै दिशे याश्च देवता, एतस्यां प्रतिवसन्ति, एताभ्यश्च वो नमः १ ॥ [2]नमोऽवान्तरायै दिशे० [3]नमो दक्षिणायै दि० [4]नमोऽवान्तरायै दि० [5]नमः प्रतीच्यै दि० [6]नमोऽवान्तरायै दि० [7]नम उदीच्यै दि० [8]नमोऽवान्तरायै दि० [9]नम ऊर्ध्वायै दि० नमो[10]ऽधरायै दिशे याश्च देवता एतस्यां प्रतिवसन्ति एताभ्यश्च वो नमः ॥ ॐ [11]नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते कृणोमि ॥ इत्येतासामेव देवतानां सार्ष्टिं सायुज्यं सलोकतां सामीप्यमाप्नोति । य एवं विद्वान् स्वाध्यायमधीते ॥ "ततो देवर्षिपितृतर्पणम्" (देवों का आवाहन करना ।) "गृत्समदस्य गायत्री" ॐ विश्वे देवास आगत शृणुता म इमँ हवमिदं बर्हिर्निषीदत ॥ "इत्यावाह्य" तर्पण करना । ॐ ब्रह्मा तृप्यतां विष्णुः० रुद्रः० प्रजापतिः० देवास्तृप्यन्तां छन्दांसि तृ० वेदाः तृ० ऋषयः तृ० तपोधनाः तृ० आचार्याः तृ० गन्धर्वाः तृ० इतराचार्याः तृ० संवत्सराः सावयवाः तृप्यन्तां देव्यः तृ० अप्सरसः तृ० देवानुगाः तृ० नागाः तृ० सागराः तृ० पर्वताः तृ० सरितः तृ० मनुष्याः तृ० यक्षाः तृ० रक्षांसि तृ० पिशाचाः तृ० सुपर्णाः तृ० भूतानि तृ० पशवः तृ० ओषधयः

---

१ दिशायों का प्रणाम करना, प्रथम पूर्व को. २ अग्निकोणको. ३ दक्षिण को. ४ नैऋत कोणको. ५ पश्चिम को. ६ वायव्य कोण को. ७ उत्तर को. ८ ईशानकोण को. ९ ऊपर को. १० नीचे को. ११ तर्पण करना.

तृ० वनस्पतयः तृ० भूतग्रामाश्चतुर्विधाः तृ० असुराः तृ० क्रूराः तृ० सर्पाः तृ० जम्बुकाः तृ० तरवः तृ० खगाः तृ० विद्याधराः तृ० वाय्वाधाराः तृ० जलाधाराः तृ० निराधाराः तृ० आकाशगामिनः तृ० पापधर्मरताः तृ० सर्वे देवास्तृ० सर्वे ग्रहास्तृप्यन्तां यमः तृप्यतां धर्मराजः तृ० मृत्युः तृ० अन्तकः तृ० वैवस्वतः तृ० कालः तृ० सर्वप्राणहरः तृ० औदुम्बरः तृ० नीलः तृ० दध्नः तृ० परमेष्ठी तृ० वृकोदरः तृ० भीमः तृ० चित्रः तृ० चित्रगुप्तः तृप्यताम् ॥ "कण्ठोपवीती ।" (गलेमें जनू रखके ऋषियोंका आवाहन करे) ॐ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥ [तर्पण करना] ओं सनकः तृप्यताम् २ सनन्दनः तृ० २ सनातनः तृ० २ सनत्कुमारः तृ० २ कपिलः तृ० २ आसुरिः तृ० २ वोढा तृ० २ पञ्चशिखः तृ० २ मरीचिः तृ० २ अत्रिः तृ० २ अङ्गिराः तृ० २ पुलस्त्यः तृ० २ पुलहः तृ० २ क्रतुः तृ० २ प्रचेताः तृ० २ भृगुः तृ० २ वसिष्ठः तृ० २ नारदः तृप्यताम् २ ॥ [बाहे तर्फ जनू करके पितरों का ध्यान करना] "ततः प्राचीनावीती" ओं उशन्तस्त्वा हवामहे ह्युशन्तः समिधीमहि । उशन्नुशत आ वह पितॄन्हविषे अत्तवे ॥ (तर्पण करना) ओं कव्यवाडनलः स्वधा नमः तृप्यताम् ३ सोमः स्व० ३ अर्यमा स्व० ३ यमः स्व० ३ अग्निष्वात्ताः स्वधानमस्तृप्यन्ताम् ३ बर्हिषदः स्व० ३ हविष्मन्तः स्व० ३ सोमपाः स्व० ३ सुकालिनः स्व० ३ आज्यपाः स्व० ३ वसवः स्व० ३ रुद्राः स्व० ३ आदित्याः स्वधा नमः तृप्य-

न्ताम् ३ ॥ "शङ्खस्य त्रिष्टुप् पितरः" उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः । असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ "यमस्य त्रिष्टुबङ्गिरसः" अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः । तेषां वयँ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः । अस्मिन्यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥ देवताभ्यः पितृभ्यश्च महा-योगिभ्य एव च । नमः स्वधा च स्वाहा च नित्यमेव भव-न्त्विह । अद्य तावत्तिथादित्यादि पिता स्वधा नमः तृप्यताम् ३ । ऊर्जं वहन्तीरमृतं घृतं मधु पयः कीलालं परिस्रुतम् । स्वधा स्थ पितृन्मे तर्पयत ॥ पितृभ्यः स्वधायिभ्यः स्वधा नमः तृप्यतां ३ । पितामहेभ्यः स्व० । प्रपितामहेभ्यः स्व० । ओं ये चेह पितरो ये च नेह याँश्च विद्म याँ उ च न प्रविद्म । त्वं वेत्थ यतिते जातवेदः स्वधाभिर्यज्ञँ सुकृतं जुषस्व ॥ पितामहः-स्वधा नमः तृप्यताम् ३ । "नारायणस्यार्षम्" ओं मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ १ ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवँ रजः । मधु द्यौरस्तु नः पिता ॥ २ ॥ मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॐ मधु ॥३॥ प्रपितामहः स्वधा नमः तृप्यताम् ३ ॥ ओं नमो वः पितरो मन्यवे नमो वः पितरः शुष्माय नमो वः पितरो जीवाय नमो वः पितरो रसाय नमो वः पितरो बलाय नमो वः पितरः क्रूराय नमो वः पितरः स्वधा वः पितरो येऽत्र पितरः स्वधा यत्र यूयं स्थ सा युष्मासु तथा यूयं यथाभागं मा-

दयध्वं ये ह पितर ऊर्ग्यत्र वयं स्मः सास्मासु तस्मै वयं ज्योग्जीवन्तो भूयास्म॥ माता—स्वधा नमः तृप्यताम् ३। पितामही स्व० प्रपितामही स्व० मातामहः स्व० प्रमातामहः स्व० वृद्धप्रमातामहः स्व० मातामहीस्व० प्रमातामही स्व० वृद्धप्रमातामही स्व० "इत्थमऽन्यान्सम्बन्धिनश्च तर्पयित्वा" (इसी तराह सब बान्धवोंकी तृप्ति करके) मातृपक्ष्यास्तु ये केचिद्ये चान्ये पितृपक्षजाः। गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः॥ ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः। जलदानेन ते सर्वे लभन्तां तृप्तिमुत्तमाम्॥ समस्तमातापितृभ्यो द्वादशदैवताभ्यः पितृभ्यो हिमपानं स्वधा क्षीरपानं स्वधा मधुपानं स्वधा तिलोदकं स्वधा उदकतर्पणं स्वधा हिमं २ रजतम् २॥ "सव्येन" वसन्ताय नमः ग्रीष्माय नमः वर्षाभ्यो नमः शरदे नमः। हेमन्ताय नमः शिशिराय नमः षड्तुभ्यो नमः॥ देवासुरास्तथा यक्षा नागा गन्धर्वकिन्नराः। पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः॥ 'कण्ठोपवीती' जलेचरा भूनिलया वाय्वाधाराश्च जन्तवः। तृप्तिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः॥ "अपसव्येन" नरकेषु च सर्वेषु यातनासु च ये स्थिताः। तेषामाप्यायनायैतद्दीयते सलिलं मया॥ येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः। ते तृप्तिमखिला यान्तु यश्चास्मत्तोभिवाञ्छति॥ येषां गृहे मया भुक्तं येषां भुंजाम्यहं पुनः। पुत्रदारविहीनाश्च नरके वा वसन्ति ये॥ तेभ्यः सर्वेभ्यः पितृभ्य इदमस्तु तिलोदकम्॥ 'सव्येन' ॐनमो देवेभ्यः "कण्ठोपवीती" स्वाहा ऋषिभ्यः। "अपसव्येन" स्वधा पितृभ्यः "सव्येन" आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं

सचराचरम् । जगत्तृप्यतु ३ एवमस्तु ॥ (सूर्य देवताको प्रणाम करना) नमो धर्मनिधानाय नमः सुकृतसाक्षिणे । नमः प्रत्यक्षदेवाय भास्कराय नमोनमः (तीर्थको प्रणाम करना) शान्तिः पुष्टिस्तथा तुष्टिः सन्तु मे त्वत्प्रसादतः । सर्वपापप्रशान्तिश्च तीर्थराज ! नमोऽस्तु ते ॥ इति सन्ध्योपासनाविधिः ॥

॥ अथ नैवेद्यमन्त्राः ॥

अमृतेशमुद्रयाऽमृतीकृत्य अमृतमस्तु अमृतायतां नैवेद्यं । सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे । महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्देवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय 'मार्गशीर्षे' रुक्मिणीसहिताय कृष्णाय । श्रीसहिताय केशवाय । 'पौषे' प्रियास० अनन्ताय । वागीश्वरीस० नारायणाय ॥ २ ॥ 'माघे' प्रीतिस० अच्युताय । कान्तास० माधवाय ॥ ३ ॥ 'फाल्गुने' शक्तिस० चक्रिणे । क्रियास० गोविन्दाय ॥ ४ ॥ 'चैत्रे' सिद्धिस० वैकुण्ठाय । मतिस० विष्णवे ॥ ५ ॥ 'वैशाखे' शोभास० जनार्दनाय विभूतिस० मधुसूदनाय ॥ ६ ॥ 'ज्येष्ठे' महिमास० उपेन्द्राय । इच्छास० त्रिविक्रमाय ॥ ७ ॥ 'आषाढे' लक्ष्मीस० यज्ञपुरुषाय । धृतिस० वामनाय ॥ ८ ॥ 'श्रावणे' कान्तिस० वासुदेवाय । रतिस० श्रीधराय ॥ ९ ॥ 'भाद्रपदे' प्राप्तिस० हरये । मायास० हृषीकेशाय ॥ १० ॥ 'आश्वियुजे' प्राकाम्यास० योगीश्वराय । धीस० पद्मनाभाय

॥ ११ ॥ 'कार्तिके' लघिमास० पुण्डरीकाक्षाय । गरिमास० दामोदराय ॥ १२ ॥ 'मलिम्लुचे' शक्तिस० योगीश्वराय सत्यभामास० नरकारये निष्कलास० महामार्तण्डाय ॥ १३ ॥ दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणयागदेवताभ्यः। भगवते वासुदेवाय सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय सत्याय पुरुषाय अच्युताय माधवाय गोविन्दाय सहस्रनाम्ने विष्णवे लक्ष्मीसहिताय नारायणाय । भवायदेवाय शर्वायदेवाय रुद्रायदेवाय पशुपतयेदेवाय उग्रायदेवाय भीमायदेवाय महादेवाय ईशानायदेवाय ईश्वरायदेवाय उमासहितायशिवाय पार्वतीसहिताय परमेश्वराय । विनायकाय एकदन्ताय कृष्णपिङ्गलाय गजाननाय लम्बोदराय भालचन्द्राय हेरम्बाय आखुरथाय विघ्नेशाय विघ्नभक्ष्याय वल्लभासहिताय श्रीमहागणेशाय । क्रौं कां कुमाराय षण्मुखाय मयूरवाहनाय सेनाधिपतये कुमाराय । भगवते ह्रांह्रींसः सूर्याय सप्ताश्वाय अनश्वाय एकाश्वाय नीलाश्वाय प्रत्यक्षदेवाय परमार्थसाराय तेजोरूपाय प्रभासहिताय आदित्याय । भगवत्यै अमायै कामायै चार्वङ्ग्यै टङ्कधारिण्यै तारायै पार्वत्यै यक्षिण्यै श्रीशारिकाभगवत्यै श्रीशारदाभगवत्यै श्रींमहाराज्ञीभगवत्यै श्रीज्वालाभगवत्यै व्रीडाभगवत्यै वैखरीभगवत्यै वितस्ताभगवत्यै गङ्गाभगवत्यै यमुनाभगवत्यै कालिकाभगवत्यै सिद्धलक्ष्म्यै महालक्ष्म्यै महात्रिपुरसुन्दर्यै सहस्रनाम्न्यै देव्यै भवान्यै। अभयङ्करीदेव्यै क्षेमङ्करीभगवत्यै सर्वशत्रुघातिन्यै इह राष्ट्राधिपतये अमुकभैरवाय । इन्द्राय वज्रहस्ताय अग्नये शक्तिहस्ताय

यमाय दण्डहस्ताय नैर्ऋतये खड्गहस्ताय वरुणाय पाशहस्ताय वायवे ध्वजहस्ताय कुबेराय गदाहस्ताय ईशानाय त्रिशूलहस्ताय ब्रह्मणे पद्महस्ताय विष्णवे चक्रहस्ताय अनन्तादिभ्योऽष्टाभ्यः कुलनागदेवताभ्यः (अनन्तवासुकितक्षककर्कोटकशङ्खपालकुलिकपद्ममहापद्मेभ्यः) अग्न्यादित्याभ्यां वरुणचन्द्रमोभ्यां कुमारभौमाभ्यां विष्णुबुधाभ्यां इन्द्राबृहस्पतिभ्यां सरस्वतीशुक्राभ्यां प्रजापतिशनैश्चराभ्यां गणपतिराहुभ्यां रुद्रकेतुभ्यां ब्रह्मध्रुवाभ्यां अनन्तागस्त्याभ्यां ब्रह्मणे कूर्माय ध्रुवाय अनन्ताय हरये लक्ष्म्यै कमलायै शिख्यादिभ्यः पञ्चचत्वारिंशद्वास्तोष्पतियागदेवताभ्यः ब्राह्म्यादिभ्यो मातृभ्यः गौर्यादिभ्यो मातृभ्यः ललितादिभ्यो मातृभ्यः दुर्गाक्षेत्रगणेश्वरदेवताभ्यः राकादेवताभ्यः त्रिकादेवताभ्यः सिनीवालीदेवताभ्यः यामीदेवताभ्यः रौद्रीदे० वारुणीदे० बार्हस्पत्यदे० ओंभूर्दे० ओंभुवोदे० ओंस्वर्दे० ओंभूर्भुवःस्वर्दे० अखण्डब्रह्माण्डयागदेवताभ्यः धूर्भ्यः उपधूर्भ्यः महागायत्र्यै सावित्र्यै सरस्वत्यै हेरकादिभ्यो वटुकादिभ्यः ॥ उत्पन्नममृतं दिव्यं प्राक्क्षीरोदधिमन्थनात् । अन्नममृतरूपेण नैवेद्यं प्रतिगृह्यताम् ॥ (इष्टदेवताका ध्यान पडकर) तत्सद्ब्रह्माऽद्यतावत्तिथावद्याऽमुकमासस्यामुकपक्षस्य तिथावमुकायामात्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थममुककर्मनिमित्तमोंनमो नैवेद्यं निवेदयामिनमः॥ (मातृकायों का बल। भाषया 'चुंट' देना) या काचिद्योगिनी रौद्रा सौम्या घोरतरा परा। खेचरी भूचरी रामा तुष्टा भवन्तु मे सदा। आकाशमातृभ्योऽन्नं नमः आकाशमातृभ्यः समालभनं गन्धो

नमः अर्घो नमः पुष्पं नमः (इष्टदेवताका ध्यान पडकर) अमुकदेवाय पायसं मोदकान् पक्कान्नमऽपूपान् वाऽन्नादि समर्पयामि नमः ।। (क्षेत्रपाल के बलिपर अक्षत और पानी छोडना) योऽस्मिन्निवसति क्षेत्रे क्षेत्रपालः सकिंकरः । तस्मै निवेदयाम्यद्य बलिं पानीयसंयुतम् । क्षांक्षेत्राधिपतयेऽन्नं नमः रांराष्ट्राधिपतयेऽन्नं नमः सर्वाभयवरप्रदो मयि पुष्टिं पुष्टिपतिर्दधातु ।। (देवोंको अक्षत फूल चडाना) आपन्नोऽस्मि शरण्योसि सर्वावस्थासु सर्वदा । भगवंस्त्वां प्रपन्नोसि रक्ष मां शरणागतमित्यादि क्षमापुष्पाणि दत्त्वा । उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा वचसा चोरसा मनसा च नमस्कारं करोमि नमः ।। (तर्पण करना) नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधिभ्यः ।। नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते कृणोमि । इत्येतासामेव देवतानां सार्ष्टिं सायुज्यं सलोकतां सामीप्यमाप्नोति य एवं विद्वान्स्वाध्यायमधीते ।। इति नैवेद्यमन्त्रः ।।

।। अथ भोजनविधिः ।।

ओं तत्रादौ लेपनं कृत्वा । ("धरतीपर मिट्टीसे लिपन करना") चतुष्कोणं तु विप्रस्य क्षत्रियस्य त्रिकोणकम् । मण्डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम् ।। पञ्चार्द्रो भोजनं कुर्याद्वाग्युतः प्राङ्मुखः शुचिः । हस्तौ पादौ तथा वक्त्रमेषा पञ्चार्द्रता मता ।। (अन्न को देख कर प्रणाम देना) अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः कथयेदिदम् । अस्माकं नित्यमस्त्वेतदिति स्मृत्वा च वन्दयेत् ।। (अन्नपात्र को पकडकर ।) अन्नपते

अन्नस्य नो देहि अनमीवस्य शुष्मिणः । प्र प्रदातारं तारिष-मूर्जं नो देहि द्विपदे शं चतुष्पदे ॥ (अन्नको पानीसे छड-काना ।) ओं उच्छिष्टोच्छिष्टोपहतं यच्च पापेन हतं मृतसूत-काद्वा । वसोः पवित्रमग्निः सवितुश्च रश्मयः पुनन्त्वन्नं मम दुष्कृतं यच्चान्यत् ॥ (दाहे तरफ अन्नके तीन भाग छोडना ।) ओंभूपतयेनमः ओंभुवनपतयेनमः ओंभूतानांपतयेनमः ॥ ३ ॥ (अपोशन लेना ।) अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः । त्वं यज्ञस्त्वं वषट्कार आपो ज्योतीरसोऽमृतम् । ब्रह्मभूर्भुवः-स्वरोम् ॥ ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना । ओममृतोपस्तरणमसि स्वाहेत्या-चम्य ॥ (अन्न खाना ।) प्राणायस्वाहा अपानायस्वाहा, समा-नायस्वाहा, उदानायस्वाहा, व्यानायस्वाहा, (इन मन्त्रों के युक्त जीव से ही खाकर, भाकय इष्टदेवके मंत्र से फी ग्रास मन्त्रित खाकर, मुख को गडूषों से शुद्धकर आचमन पीना ।) अमृतापि-धानमसि स्वाहा ॥ (शुद्ध किई हुई दाहे हाथ के अंगूठसे दाहे पैर के अंगूठ पर पानी छोडना ।) अङ्गुष्ठमात्रः पुरुषः सोङ्गुष्ठा-ग्रमुपाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुक् ॥ (इष्टदेव की स्मरण करना ।) प्राणोग्निः परमात्मा वै पञ्चवा-युसमाश्रितः । स प्रीतः प्रीणातु विश्वं विश्वभुक् ॥ विश्वोसि वैश्वानरोसि विश्वमाभाससे जायमानः । विशन्ति त्वामाहुत-यश्च सर्वाः प्रजास्तत्र यत्र विश्वामृतोऽसि ॥ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ अहमन्नमहमन्नादोऽहमन्नादः ॥ राज्ञां शिवं

चास्तु तथा द्विजानां गवां शिवं चास्तु तथा प्रजानाम् । आतङ्कहीनं जगदस्तु सर्वं दोषाः प्रणाशं सकलाः प्रयान्तु ॥

इति भोजनविधिः ॥

॥ अथ पञ्चगव्यविधिः ॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । निर्दिष्टं पञ्चगव्यं तु पवित्रं कायशोधनम् ॥ (छयके भर्तनों में छे ही वस्तु समानभाग से चूने से लिखे हुई अष्टदलों पर रखना ।) गोमूत्रमुत्तरे[1] स्थाप्यं गोमयं वारुणे न्यसेत् । सर्पिर्याम्यां दधि प्राच्यां क्षीरं मध्ये तु निक्षिपेत् । कुशोदकं तथैशान्यां पञ्चगव्यस्थितेर्विधिः ॥ गायत्र्या[2]ऽदाय गोमूत्रं गन्धद्वारेति गोमयम् । आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि । तेजोसीति घृतं प्रोक्तं देवस्य त्वा कुशोदकम् ॥ गोमूत्रं गोमये क्षेप्यं ते संक्षिप्ये घृते

---

१ उत्तर के अष्टदलपर गोमूत्र का भरतन रखना, पश्चिम के गोमय, दक्षिण के घृत, पूर्व के दही बीचमें दूध, और विष्टर समेत पानी, ईशानकांन के अष्टदल पर रखना । यह पञ्चगव्यस्थापन की रीति है ॥ २ गायत्री के (**ओंभूर्भुवः स्वः**) इस मन्त्र से गोमूत्र, (**गन्धद्वारां,**) इस से गोमय, (**आप्यायस्व**) इस से दूध, (**दधिक्राव्णो,**) इस से दही, (**तेजोसि,**) इस से घृत, (**देवस्य त्वा,**) इस मंत्र से कुशोदकमन्त्रित करना चाहिये ॥ उन मन्त्रों से प्रथम मन्त्रित करके फिर अपने २ मंत्र से मंत्रित गोमय में गोमूत्र छोडना । इसी तरह अपने दानों मन्त्रों से और मन्त्रित वे दानों घृत में फेंकना । फिर वह मंत्रित तीन दही में छोडना । वह चार दूध में फेंकना । वह पांछही कुशोदक में छोडके (**"आपो हिष्टा"**) इस मंत्र से सिलाप करकें ("ॐ") इस मंत्र से मंत्रित वह पञ्चगव्य तीन दफा, पद्मपत्र या ताम्रपात्र रौप्ये या सोने के बरतन से पीना चाहिये ॥ और (**शुद्धवती**) 'याने' (**"एतो न्विन्द्रं स्तवा"**) इन मंत्रो से क्रियायोग्य भूमियों को भी शुद्धि करनी चाहिये ॥ यह मंत्र नीचे विस्तार से लिखे गये हैं ॥

तथा । तानि दध्नि प्रक्षेप्यानि तत्सर्वं पयसोन्तरे । एकीकृत्य तु तत्सर्वं कुशोदकविमध्यगम् । आपो हिष्ठेति चालोड्य प्रणवेन तु तत्पिबेत् ॥ औदुम्बरे पद्मपत्रे रौप्यपात्रे हिरण्मये । मन्त्रपूतं पिबेत्तत्तु त्रीन्वारान्पञ्चगव्यकम् ॥ शुद्धवतीति मन्त्रेण प्रक्षिपेद्दिक्षु सर्वतः ॥

(गोमूत्र को पडना ।) ओं गायत्र्यै नमः ओं भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् ३ ॥ (गोमय को ।) गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ (दूध को ।) आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यम् । भवा वाजस्य सङ्गथे । (दही को) दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाङ्करत् प्र ण आयूंषि तारिषत् ॥ (घीको) तेजोसि शुक्रमसि ज्योतिरसि धामनामासि प्रियन्देवानामनादिष्टं देवयजनं देवताभ्यस्त्वा देवताभ्यो गृह्णामि देवेभ्यस्त्वा यज्ञेभ्यो गृह्णामि (कुशोदक, यामे, विष्टरसमेत पानी को) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ (फिर गोमूत्र गोमय में मिलाकर और गोमय व गोमूत्र का मंत्र पडना ॥ वे घृत में, लगा कर और गोमूत्र गोमय और घृत का मंत्र पडना । इसी रीति से वे दही में, वे क्षीर में, वे सब विष्टरयुतपानी में जमाकरके, रलावने का मंत्र पडना ।) आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन, महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेहनः, उशतीरिव मातरः । तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ, आपो जनयथा च नः ॥ (अब कुशा के विष्टर से दिशायों की शुद्धि करनी ।) इतो न्विन्द्रं स्तवामहेऽहं

शुद्धः शुद्धेन साम्ना । शुद्धैरुक्थैर्वावृध्वांसंशुद्ध आशीर्वान्मम ॥ तुतान्ध्रुवाम यज्ञिर इन्द्रमुक्ता नवावृधः । पुरूण्यऽस्य पांस्या-सिषासन्तो हवामहे ॥ इन्द्र शुद्धो हतो न हि शुद्धः शुद्धाभि-रूतिभिः । शुद्धो रयिं निधारय शुद्धः समद्धि सौम्यः ॥ इन्द्रः शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे । शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजो सिषासहि ॥ पञ्चव्युष्टीरनुपञ्च दुहा गा पञ्चनाम्नीमृतवोऽनुपञ्च । पञ्चदिशः पञ्चदशेन क्लृप्ताः समा-नमूर्ध्नीरभिलोकसेकम् ॥ इतिपञ्चगव्यविधिः ॥

॥ ॐ अथ विष्णुपञ्चायतनपूजाविधिः ॥

(पानी से संकल्प छोडना) ॐ अस्य श्रीआसनशोधन-मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं च्छन्दः कूर्मो देवता आसनशोधने विनियोगः । (धरती को नमस्कार करना) पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ (धरती को आसन रखना) ॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि । (गन्ध अक्षत व फूल चडाना) श्रीं पृथिव्यै आधा-रशक्त्यै समालभनं गन्धोनमः, अर्घोनमः पुष्पं नमः ॥ (अब हाथ जोड के देवों का स्मरण करना) शुक्लाम्बरधरं विष्णुं शशि-वर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ अभि-प्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि । सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः । लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ महाबले महोत्साहे महाभयविनाशिनि । त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयव-

धिनि ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः । गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ॥ ॐ गुरवे नमः, परमगुरवे नमः, परमेष्ठिने गुरवे परमाचार्याय नमः, आदिसिद्धेभ्यो नमः ॥ ॥ (अथ दोनों हाथों के अनामिका के मध्यपर्व पर कुशाकाण्ड रख के न्यास करना) ॐ अ नाभौ, उ हृदि, म शिरसि । भूः पादयोः, भुवः हृदि, स्वः शिरसि । ॐभूः अङ्गुष्ठाभ्यां नमः, भुवः तर्जनीभ्यां नमः, स्वः मध्यमाभ्यां नमः, महः अनामिकाभ्यां नमः, जनः कनिष्ठिकाभ्यां नमः, तपः सत्यं करतलकरपृष्ठाभ्यां नमः । भूः पादयोः, भुवः जान्वोः, स्वः गुह्ये, महः नाभौ, जनः हृदि, तपः कण्ठे, सत्यं शिरसि । ॐभूः हृदयाय नमः, भुवः शिरसे स्वाहा, स्वः शिखायै वषट्, महः कवचाय हुं, जनः नेत्राभ्यां वौषट्, तपः सत्यं अस्त्राय फट् ॥ तत्सवितुरङ्गुष्ठाभ्यां नमः, वरेण्यं तर्जनीभ्यां नमः, भर्गो देवस्य मध्यमाभ्यां नमः, धीमहि अनामिकाभ्यां नमः, धियोयोनः कनिष्ठिकाभ्यां नमः, प्रचोदयात् करतलकरपृष्ठाभ्यां नमः ॥ तत् पादयोः, सवितुर्जान्वोः, वरेण्यं कट्यां, भर्गो नाभौ, देवस्य हृदये, धीमहि कण्ठे, धियो नासिकायां, यश्चक्षुषे, नः ललाटे, प्रचोदयाच्छिरसि ॥ तत्सवितुर्हृदयाय नमः, वरेण्यं शिरसे स्वाहा, भर्गो देवस्य शिखायै वषट्, धीमहि कवचाय हुं, धियो योनः नेत्राभ्यां वौषट्, प्रचोदयादस्त्राय फट् ॥ आपः स्तनयोः, ज्योतिर्नेत्रयोः, रसो मुखे, अमृतं ललाटे, ब्रह्मभूर्भुवः स्वरों शिरसि ॥ ॥ ॐ तद्विष्णोः परमं पदं हृदयाय नमः, सदा पश्यन्ति सूरयः शिरसे स्वाहा, दिवीव चक्षुराततं शिखायै वषट्, तद्विप्रासो विपन्यवो कवचाय हुं,

जागृवांसः समिन्धते नेत्राभ्यां वौषट्, विष्णोर्यत्परमं पदम् अस्त्राय फट् ॥ यो रुद्रो अग्नौ हृदयाय नमः, यो अप्सु य ओषधीषु शिरसे स्वाहा, यो वनस्पतिषु शिखायै वषट्, यो रुद्रो विश्वा भुवना विवेश कवचाय हुं, तस्मै रुद्राय नेत्राभ्यां वौषट्, नमो अस्तु देवा अस्त्राय फट् ॥ ॥ गणनान्त्वा गणपतिं हवामहे हृदयाय नमः, कविं कवीनां शिरसे स्वाहा, उपमश्रवस्तमं शिखायै वषट्, ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पते कवचाय हुं, आनः शृण्वन्नेत्राभ्यां वौषट्, ऊतिभिः सीद सादनमस्त्राय फट् ॥ ॥ चित्रं पादयोः, देवानां जंघयोः, उदगात् जान्वोः, अनीकमूर्वोः, चक्षुः शिश्ने, मित्रस्य गुह्ये, वरुणस्य नाभौ, अग्नेर्हृदि, आप्राद्यावा पृथिवी कण्ठे, अन्तरिक्षं बाह्वोः, सूर्य मुखे, आत्मा नासिकायां, जगतः नेत्रयोः, तस्थुषः ललाटे, च शिरसि ॥ ॥ जात शिखायां, वेदसे ललाटे, सुनवाम कर्णयोः, सोमं नासिकायां, अराति चक्षुषोः, यत ओष्ठयोः, नि दन्तेषु, दहाति तालुनि, वेद जिह्वायां, स ग्रीवायां, नः बाह्वोः, पर्षत् हृदि, अति स्तनयोः, दुर् कुक्षौ, गाणि नाभौ, विश्वा पृष्ठे, नाव पाण्योः, इव वृष्णयोः, सिन्धुं शिश्ने, दुर् कव्यां, इत ऊर्वोः, अति जङ्घयोः, अग्निः पादयोः ॥ ॥ (अङ्गुलियों से दर्भकाण्ड छोड के, दिशायों को तिल फैंकना) । अपसर्पन्तु ते भूता ये दिवि भुवि च स्थिताः । ये दिक्षु विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ (अब प्राणायाम कर के, मुंह और पैरों को छिडकाना) । तीर्थे स्नेयं तीर्थमेव समानानां भवति, मानः शंस्योररुषो धूर्तिः प्राणङ् मर्त्यस्य रक्षाणो ब्रह्मणस्पते ॥ ॥ (अब अनामिका के उपरे पर्वपर पवित्र

धारना)। वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः ॥ (अब अपने आप को गन्ध अक्षत व फूल चडाना)। परमात्मने पुरुषोत्तमाय पञ्चभूतात्मकाय विश्वात्मने मन्त्रनाथाय आत्मने नारायणाय आधारशक्त्यै समालभनं गन्धोनमः अर्घोनमः पुष्पं नमः॥ (दीवा को गन्ध अक्षतफूल)। स्वप्रकाशो महादीपः सर्वतस्तिमिरापहः। प्रसीद मम गोविन्द दीपोयं प्रतिकल्पितः ॥ (धूप को)। वनस्पतिरसो दिव्यो गन्धाढ्यो गन्धवत्तमः। आधारः सर्वदेवानां धूपोऽयं परिकल्पितः ॥ (सूरज को)। नमो धर्मनिधानाय नमः स्वकृतसाक्षिणे । नमः प्रत्यक्षदेवाय भास्कराय नमोनमः ॥ (विष्टर और अक्षत समेत अर्घापात्र से पानी संकल्प छोडना) ॥ यत्रास्ति माता न पिता न बन्धुर्भ्रातापि नो यत्र सुहृज्जनश्च । न ज्ञायते यत्र दिनं न रात्रिस्तत्रात्मदीपं शरणं प्रपद्ये ॥ आत्मने नारायणाय आधारशक्त्यै दीपधूपसंकल्पात्सिद्धिरस्तु दीपोनमः धूपोनमः॥ ॐतत्सद्ब्रह्म अद्यतावत्तिथावद्य अमुकमासस्य अमुकपक्षस्य तिथावमुकायां भगवते वासुदेवाय ८ लक्ष्मीसहिताय नारायणाय । भवाय देवाय ८ पार्वतीसहिताय परमेश्वराय। विनायकाय ८ वल्लभासहिताय श्रीमहागणेशाय। ह्रां ह्रीं सः सूर्याय ८ प्रभासहिताय आदित्याय। भगवत्यै अमायै ८ सहस्रनाम्न्यै देव्यै भवान्यै विष्णुपञ्चायतनदेवताभ्यो दीपो नमः धूपो नमः ॥ अपसव्येन। (बाहे जनू करके तिलयुत से)। नमः पितृभ्यः प्रेतेभ्यो नमो धर्माय विष्णवे। नमो यमाय रुद्राय कान्तारपतये नमः॥

॥ ॐ तत्सद्ब्रह्म० नित्यकर्मनिमित्तं । पित्रे पितामहाय प्रपितामहाय । मात्रे पितामह्यै प्रपितामह्यै । मातामहाय प्रमातामहाय वृद्धप्रमातामहाय । मातामह्यै प्रमातामह्यै वृद्धप्रमातामह्यै समस्तमातापितृभ्यो द्वादशदैवतेभ्यः पितृभ्यः दीपःस्वधा धूपः स्वधा ॥ सव्येन (दाहे जनू करके, तिल अक्षत गन्ध विष्टर और पानीसमेत अवापात्र में तीन मन्त्रों से तीन फूल पाना) ॥ संवः सृजामि हृदयं, संसृष्टं मनो अस्तु वः । १ । संसृष्टा तन्वः सन्तु वः संसृष्टः प्राणो अस्तु वः । २ । सं यया वः प्रियास्तन्वः संप्रिया हृदयानि वः । आत्मा वो अस्तु संप्रियः संप्रियास्तन्वो मम । ३ । (उस पानी से देवों को जीवादान देना, याने उन पर पाना) । अश्विनोः प्राणस्तौ ते प्राणन्दत्तां तेन जीव, मित्रावरुणयोः प्राणस्तौ ते प्राणन्दत्तान्तेन जीव, बृहस्पतेः प्राणः स ते प्राणन्दत्तान्तेन जीव ॥ (अब देवों को देह के तराह हाथसे दो दर्भकाण्ड रखके चामर सा न्यास करना) यथा देहे तथा देवे न्यासकर्म समाचरेत् । विना न्यासेन यत्कर्म त्वर्धं गृह्णन्ति राक्षसाः । न्यासमूलमिदं सर्वं तस्मान्न्यासं समाचरेत् अ नाभौ, उहृदि० । (अब अक्षत समेत दो दर्भकाण्ड हाथ में रख के देवों की पृच्छा करना। याने पूजा शिरो करने की आज्ञा लेना) ॥ ॐ भूःपुरुषमावाहयामि नमः ॐ भुवःपुरुषमावाहयामि नमः ॐ स्वःपुरुषमावाहयामि नमः ॐ भूर्भुवःस्वःपुरुषमावाहयामि नमः ॥ २ ॥ ॐ भूर्भुवःस्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात् ॥ ३ ॥ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपदाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते

सहस्रकोटीयुगधारिणे नमः ॥३॥ वासुदेवाय विद्महे लक्ष्मी-नारायणाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥ ३ ॥ जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ॥ ३ ॥ ॐ नमः कारणवामनाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ३ ॥ विश्वरूपाय विद्महे विष्वक्सेनाय धीमहि, तन्नो विष्णुः प्रचोदयात् ॥ ३ ॥ नरसिंहाय विद्महे नरकोत्तारणाय धीमहि, तन्नो विष्णुः प्रचोदयात् ॥ ३ ॥ तत्पुरुषाय विद्महे महादेवाय धीमहि, तन्नः शिवः प्रचोदयात् ॥ ३ ॥ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि, तन्नो दन्ती प्रचोदयात् ॥३॥ भास्कराय विद्महे सहस्ररश्मये धीमहि, तन्नः सूर्यः प्रचोदयात् ॥ ३ ॥ सुभगायै विद्महे काममालिन्यै धीमहि, तन्नो दुर्गा प्रचोदयात् ॐ तत्सद्ब्रह्म अद्यतावत्तिथावद्य अमुकमासस्य अमुकपक्षस्य तिथावमुकायां, भगवतः वासुदेवस्य ८ लक्ष्मीसहितस्य नारायणस्य, भवस्य देवस्य ८ पार्वतीसहितस्य परमेश्वरस्य, विनायकस्य ८ वल्लभासहितस्य श्रीमहागणेशस्य ह्रांह्रीं सः सूर्यस्य ८ प्रभासहितस्य आदित्यस्य, भगवत्या अमायाः ८ सहस्रनाम्न्या देव्याः भवान्या विष्णुपञ्चायतनदेवतानां, आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं श्रीविष्णुप्रीत्यर्थं विष्णुपञ्चायतनपूजनमर्चामहं करिष्ये ॐ कुरुष्व ॥ तिलसर्षपयवान्विकीर्य । (तिल सर्षप व जऊं तर्फ़ को फैंककर दो दो दर्भकाण्ड आसन देना ।) पुरुष एवेदं, ध्रुवा द्यौरित्यासनम् ॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रु-

वासः पर्वता इमे । ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि ॥ भगवतः वासुदेवस्य ८ लक्ष्मीसहितस्य नारायणस्य, भवस्य देवस्य ८ पार्वतीसहितस्य परमेश्वरस्य, विनायकस्य ८ वल्लभासहितस्य श्रीमहागणेशस्य, ह्रांह्रींसः सूर्यस्य प्रभासहितस्य आदित्यस्य भगवत्याः अमायाः ८ सहस्रनाम्न्या देव्या भवान्याः विष्णुपञ्चायतनदेवतानामिदमासनं नमः ॥ (अब अक्षत समेत दो दर्भ हाथमें रख के देवों को पूजाज्ञा लेने के पूर्वक आवाहन करना) ॥ भगवते वासुदेवाय ८ लक्ष्मीसहिताय नारायणाय, भवाय देवाय ८ पार्वतीसहिताय परमेश्वराय, विनायकाय ८ वल्लभासहिताय श्रीमहागणेशाय, ह्रांह्रींसः सूर्याय ८ प्रभासहिताय आदित्याय, भगवत्यै अमायै ८ सहस्रनाम्न्यै देव्यै भवान्यै विष्णुपञ्चायतनदेवताभ्यः युष्मान्वः पूजयामि ॐ पूजय (अक्षत कन्दों से फैंक के, नवा अक्षत और रख के) सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ युञ्जते मा न उत युञ्जाते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुना विदेक इन्मही देवस्य सवितुः परिष्टुति ॥ "देवश्रुतौ देवेष्वाघोषेथाम्" ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्, समूढमस्य पांसुरे ॥ इळावती धेनुमती हि भूतं सूर्यवसिनी मनुष्ये यशस्ये । व्युष्टुभ्ना रोधसी विष्ण एते दधात पृथिवीमभितो मयूखैः, वैष्णवमसि विष्णुस्तु तुभ्नातु ॥ दिवो वा विष्णुरुत वा पृथिव्या महो वा विष्णुरुतोर्वन्तरिक्षात् । हस्तौ पृणस्व बहुभिर्वासव्यैराप्रयच्छ दक्षिणादुत सव्यात् ॥

विष्णुर्नु कं वीर्याणि प्रावोचं यः पार्थिवानि विममे रजांसि।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥ विष्णोः
पृष्टमसि विष्णो श्नप्त्रेस्थो विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि
विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ॥ प्रतद्विष्णुः स्तवते
वीर्येण मृगो न भीमः कुचरो गिरिष्ठः । यस्योरुषु त्रिषु विक्र-
माणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ भगवन्तं वासुदेवं ८
लक्ष्मीसहितं नारायणं, भवं देवं ८ पार्वतीसहितं परमेश्वरं,
विनायकं ८ वल्लभासहितं श्रीमहागणेशं, ह्रांह्रींसः सूर्यं ८ प्रभा
सहितं आदित्यं, भगवतीं उमां ८ सहस्रनाम्नीं देवीं भवानीं,
विष्णुपञ्चायतनदेवताः आवाहयिष्यामि ॐ आवाहय ॥ (य
पडते हुई, हाथ की दर्भ व अक्षत कन्दों से फैंककर । फी श्लोक
देवों को फूल चडाना । प्रथम विष्णु को) ॥ आवाहयाम्यमर
वृन्दनुताङ्घ्रियुग्मं लक्ष्मीपतिं भुवनकारणमप्रमेयम् । आद्यं सना
तनतनुं प्रणवासनस्थं पूर्णेन्दुभास्करहुताशसहस्ररूपम् ॥ १ ॥
ध्येयं परं सकलतत्त्वविदां वरेण्यं वाराहकापिलनृकेसरिसौम्य
मूर्त्तिम् । श्रीवत्सकौस्तुभमहामणिभूषिताङ्गं कौमोदिकीकमल
कम्बुरथाङ्गहस्तम् ॥ २ ॥ त्वं सर्वगोसि भगवन्किल यद्यपि
त्वामावाहयामि हि यथा व्यजनेन वायुम् । गूढो यथैव दहनो
मथनादुपैति ह्यावाहितोसि त्वमुपैषि तथैव चार्चाम् ॥ ३ ॥
मालाधराच्युत विभो परमात्ममूर्ते सर्वज्ञ नाथ परमेश्वर सर्व
शक्ते । आगच्छ मे कुरु दयां प्रतिमां भजस्व पूजां गृहाण
मदनुग्रहकामयाद्य ॥ ४ ॥ आवाहयामि मणिसन्निभमात्म
बिम्बे मायापुरे हृदयपङ्कजसन्निविष्टम् । श्रद्धानदीविमलचित्त

जलाभिषेकं भावाष्टपुष्पविधिना हरिमर्चयामि ॥ ५ ॥ (शिव जी को) । लिङ्गेत्र भक्तदयया क्षणमात्रमेकं स्थानं विधाय भव सन्निहितां पुरारे । सर्वेश विश्वमय हृत्कमलाधिरूढः पूजां गृहाण भगवन्भव मेद्य तुष्टः ॥ १ ॥ भूमेर्जलात्तु पवनादनलाद्धिमांशोरुष्णांशुतो हृदयतो गगनात्समेत्य । लिङ्गेच सन्मणिमये मदनुग्रहार्थं भक्त्यैकलभ्य भगवन् कुरु सन्निधानम् ॥ ॥ २ ॥ (गणपति जी को) । शैलेश्वरस्य तनयार्भक भक्तविघ्ननाशाय हस्तधृतदण्डकुठारपाश । द्वारेश सर्वगणनायक पद्महस्त पूजां गृहाण भगवन् भव मेद्य तुष्टः ॥ १ ॥ ध्याये गजाननं देवं तप्तकाञ्चनसन्निभम् । चतुर्भुजं महाकायं सर्वाभरणभूषितम् । दन्ताक्षमालापरशू पूर्णमोदकपात्रकम् । मोदकैः सुप्तशुण्डाग्रमेकदन्तं विनायकम् । उमासुतं च विघ्नेशं विश्वव्यापिनमीश्वरम् । आवाहयामि पूजार्थमागच्छ द्विरदानन ॥ ३ ॥ (सूरज जी को) । ब्रह्माण्डगेहपरिदीपक शम्भुमूर्ते तेजोनिधान खचरेश्वर पूर्वदेव । पंचोपचारविधिना विहितां मयाद्य पूजां गृहाण भगवन्भव मेऽद्य तुष्टः ॥ १ ॥ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या पीडां हर दिवाकर । त्रैलोक्यं भूषितं येन भुवनानि चतुर्दश । अव्यक्तं व्यक्तिमारूढं रविमावाहयाम्यहम् ॥ २ ॥ (दुर्गा को) श्रीशारदे सुरवरे त्रिपुरे सुरेशि दुर्गे भवानि खलु वैखरि विश्वमातः । शर्वार्धदेहनिलये परिवारयुक्ता पूजां गृहाण सुभगे भव मेऽद्य तुष्टा ॥ १ ॥ आवाहयाम्यहं दुर्गां शङ्खचापशरान्विताम् । त्रिशूलहस्तां वरदां त्रिनेत्रां चारुहासिनीम् । एह्येहि दुर्गे वरदे

भजस्व प्रतिमां सदा। अनुकम्पस्व मां भक्त्या कृपां कुरु महेश्वरि ॥ २ ॥ (नीचले मन्त्र तीन वार पढ कर तीन फूल सब देवों को चढाकर, अञ्जलि कर के मानसिक पूजा करके बाहर प्रतिमापर रखना)। भगवन् पुण्डरीकाक्ष भक्तानुग्रहकारक। अस्मद्यानुरोधेन सन्निधानं कुरु प्रभो ॥ ३ ॥ इत्याहूय तु गायत्रीं त्रिः समुच्चार्य तत्त्ववित्। मनसा चिन्तितैर्द्रव्यैर्देवमात्मनि पूजयेत्। तेजोरूपं ततः क्षिप्त्वा प्रतिमायां पुनर्यजेत् ॥ (जऊं फैंक कर और प्राणायाम भी कर के। अर्घा का पानी हाथ से वापस उसी में पाना)। "पाद्यार्थमुदकं नमः"। शन्नो देवीरभिष्टये आपो भवन्तु पीतये। संय्योरभि स्रवन्तु नः ॥ (उस में लाजा गन्ध सर्वौषधि विष्टर और पानी पाना, वह पांच पाद्य की द्रव्य हैं, याने देवों के पैर धोने के द्रव्य हैं) ॥ लाजाश्च कुङ्कुमं चैव सर्वौषधिसमन्वितम्। दर्भाकुरं जलं चैव पञ्चाङ्गं पाद्यलक्षणम् ॥ भगवन्तः पाद्यंपाद्यम् ॥ (इन मन्त्रों से पाद्य देना)। एतावानस्य, हिरण्यवर्णा, इति पाद्यम् ॥ एतावानस्य महिमाऽतो ज्यायांश्च पूरुषः। पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ १ ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। या अग्निं गर्भं दधिरे विरूपास्ता न आपः शंस्योना भवन्तु ॥ २ ॥ भगवते वासुदेवाय ८ लक्ष्मीसहिताय नारायणाय, भवायदेवाय ८ पार्वतीसहिताय परमेश्वराय, विनायकाय ८ वल्लभासहिताय श्रीमहागणेशाय, ह्रांह्रींसः सूर्याय ८ प्रभासहिताय आदित्याय, भगवत्यै अमायै ८ सहस्रनाम्न्यै देव्यै भवान्यै विष्णुपञ्चायतनदेवताभ्यः पाद्यं नमः ॥ शेषं निवारयेत् (अर्घा

से पाद्य का शेष हटाना) ॥ (और भी अर्घा में हाथ से पानी वापस करना।) पुनः। शन्नो देवी० ॥ (उस में पानी दूध विष्टर घी दही चावल जऊं और सर्षप पाना, वह आठ द्रव्य अर्घा याने हाथ, मुंह धोने के चीज हैं)। आपः क्षीरं कुशाग्राणि घृतं च दधि तण्डुलाः। यवाः सिद्धार्थकाश्चेति ह्यर्घ्यमष्टाङ्गमुच्यते ॥ भगवन्तः। अर्घ्यमर्घ्यम् ॥ (देवों को देना) ॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः। ततो विश्वं व्यक्रामत्साशनानशने अभि ॥ १ ॥ आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयते हनः। उशतीरिव मातरः ॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा चनः ॥ भगवन् वासुदेव ८ लक्ष्मीसहित नारायण, भवदेव पार्वतीसहित परमेश्वर, विनायक ८ वल्लभासहित श्रीमहागणेश, हां ह्रींसः सूर्य ८ प्रभासहित आदित्य, भगवति अम्बे ८ सहस्रनाम्नि देवि भवानि विष्णुपञ्चायतनदेवता इदं वः अर्घ्यं नमः ॥ (साफ पानी से आचमन देना याने मुंह सफा करावना) तस्माद्विराट्, शन्न आप, इत्याचमनीयम् ॥ तस्माद्विराडजायत विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ १ ॥ शन्न आपो धन्वन्याः शन्नः सन्त्वनूप्याः। शन्नः समुद्रिया न आपः शमुनः सन्तु कूप्याः ॥ भगवते वासुदेवाय ८ लक्ष्मीसहिताय नारायणाय, भवायदेवाय ८ पार्वतीसहिताय परमेश्वराय, विनायकाय ८ वल्लभासहिताय श्रीमहागणेशाय, हांह्रींसः सूर्याय ८ प्रभासहिताय आदित्याय, भगवत्यै अमायै ८ सहस्रनाम्न्यै देव्यै

भवान्यै विष्णुपञ्चायतनदेवताभ्यः आचमनीयं नमः ॥ (शरीर की मैलाई उठाने के वास्ते थोडासा पानी देना) । **यत्पुरुषेण, इदमापः** इति मन्त्रस्नानीयम् ॥ **यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १ ॥ इदमापः प्रवहत यत्किंचिद्दुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥ भगवते वासु० विष्णुपञ्चायतनदेवताभ्यः मन्त्रस्नानीयं नमः ॥** (अत्र पानी दूध दही घी शहद लाजा सर्षप तिल जव शाली विष्टर दूर्वा मिट्टी भस्म मेवा मिठास) (घी, शहद, दूध खण्ड और अंगूर रूप) पञ्चामृत पञ्चगव्य कपूर सर्वौषधी गन्ध और फूल, यह एकीसद्रव्य पात्र में जमा करना, यद्यपि यह बाईस हैं तथापि पानी सबके साथ होने से गिनती में नहीं लेने से एकीस ही हैं) । **पयो दधिघृतक्षौद्रलाजासिद्धार्थकास्तिलाः । यवव्रीहिकुशादूर्वामृद्भस्मफलशर्कराः । पञ्चामृतं पञ्चगव्यं कर्पूरौषधयस्तथा । एकविंशतिस्नानानि गन्धाढ्यैः कुसुमैरपि ॥** (इन से भी मन्त्र पढ कर स्नान देना) । (पानी) **उदुत्तमं वरुणं पाशमस्मदवाधमं विमध्यमं श्रथाय । अथा वयमादित्यव्रते तवानागसो अजितये स्याम ।** (क्षीर) **पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः, पयस्वतीः प्रदिशः सन्तु मह्यम्** (दही) **दधि क्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाकरत्प्रण आयूंषि तारिषत्** (घी) **घृतवती भुवनानामभिश्रियोर्वी पृथिवी मधुदुघे सुपेशसा । द्यावापृथिवी वरुणस्य धर्मणा विष्कम्भिते अजरे भूरिरेतसा** (शहद) **मधुवाता ऋतायते मधु क्षिरन्ति सिन्धवः, माध्वीर्नः सन्त्वौषधीः ॥**

मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः, मधु द्यौरस्तु नः पिता॥ मधुमान्नो वनस्पतिर्मधुमांअस्तु सूर्यः, माध्वीर्गावो भवन्तु नः॥ (लाजा) तदस्य रूपममृतं शचीभिस्तिस्रो दधुर्देवताः संरराणाः। लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मांसमभवन्न लाजाः (सर्षप) रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म। शिशानो अग्निः क्रतुभिः समृद्धः स नो दिवः सरिषः पातु नक्तम् (तिल) तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रयत्नवद्भिः पितृंल्लोकान्प्राण आयाहि नः स्वधा (यवा) यवोसि यवयास्मद्द्विषं यावयारातिम्। पितृषदनं त्वा लोकमास्तृणामि (शाली) धान्यमसि धिनोहि देवान्धिनोहि यज्ञं धिनोहि यज्ञपतिं धिनोहि मां यज्ञम् (दर्भांकुर) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादधे (दूर्वा) काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च (मिट्टी) आक्रम्य वाजिन्पृथिवीमग्निमिच्छा रुचा त्वम्। भूम्यायत्त्वायनो ब्रूहि यतः खनेम ते वयम् (भस्म) प्रसद्य भस्मना योनिमापश्च पृथिवीमग्नेः। संसृज्य मातृभिष्ट्वं ज्योतिष्मान्पुनरासदः (मेवा) याः फलिनीर्या अफला अकोशाः कोशिनीश्च याः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः (मिठास) शर्कराभिरवकामवकाभिः शर्करामुत्सादेन। जिह्वामवक्रन्देन तालुं सरस्वती जिह्वाग्रेण (पञ्चामृत) पञ्चन्युष्टीरनु पञ्च दुहा गां पञ्चनाम्नीमृतवोऽनु पञ्च। पञ्च दिशा पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरभिलोकमेकम्। (पञ्चगव्य) गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्, मिश्रीकृत्य॥ समुद्रादूर्मिर्मधुमां उदारदुपांशुना-

समममृतत्वमानट्। घृतस्य नाम गुह्यं यदस्ति जिह्वा देवाना-मऽमृतस्य नाभिम् (कपूर) त्र्यम्बकं यजामहे सुगन्धि पुष्टिव-र्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् (सर्वौ-षधीः) या ओषधयः प्रथमजा देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामहं शतं धामानि सप्त च (गन्ध) गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रि-यम् (फूल) पुष्पवतीः प्रसूमतीः फलिनीरफला उत। अश्वा इव सजित्वरी वीरुधः पारयिष्णवः॥ भगवते वासुदेवाय ८ लक्ष्मी-सहिताय नारायणाय, भवाय देवाय ८ पार्वतीसहिताय परमे-श्वराय, विनायकाय ८ वल्लभासहिताय महागणेशाय, ह्रांह्रींसः सूर्याय ८ प्रभासहिताय आदित्याय, भगवत्यै अमायै ८ सह-स्रनाम्न्यै देव्यै भवान्यै विष्णुपञ्चायतनदेवताभ्यः, एकविंशति-स्नानानि नमः॥ (अत्र पानी दूध दही घी शहद जऊं खण्ड सर्षप तिल सोने का पत्र कपूर गन्ध लाजा अखरोट फूल और सर्वौषधी पात्रमें जमा रखके "द्वादशीदिन के विना" विष्णु को स्नान देना) अम्बुना पयसा दध्ना घृतेन मधुना यवैः। शर्करा सर्षपतिलैस्तथा चामी-करेण वै। कर्पूरकुङ्कुमाभ्यां च लाजाऽक्षोटैः सपुष्पकैः। सर्वौ-षध्यस्तथा पश्चाद्विष्णोः स्नानानि षोडश। दद्यात्षोडशस्नानानि षोडशर्चेन विष्णवे॥॥ आदौ शुद्धजलेन (प्रथम सफा पानी से) वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमय-क्ष्माव: प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः॥ भग-वते वासुदेवाय ८ लक्ष्मीसहिताय नारायणाय शतधारोदकं नमःसहस्रधारोदकं नमः॥ (शंख से षोडशद्रव्यों को स्नान)।

"पुरुषमेधाः पुरुषस्य नारायणस्यार्षम्" सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्त्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषः एवेदं सर्वं यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥ एतावानस्य महिमातो ज्यायांश्च पूरुषः । पादोस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि ॥ ३ ॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः । ततो विश्वं विक्रामत्साशनानशने अभि ॥ ४ ॥ तस्माद्विराडजायत विराजो अधिपूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ७ ॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥ ८ ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥९॥ तस्तादश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ १० ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥ ११ ॥ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ १२ ॥ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ १३ ॥ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयत् ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा

यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ १५ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥ तद्विष्णोः० । भगवते वासुदेवाय ८ लक्ष्मीसहिताय नारायणाय षोडशस्नानानि नमः ॥ (अब पानी दूध दही घी शहद खण्ड सर्वौषधी शाली फूल मेवा सर्षप लाजा गन्ध सुनपत्र और रत्न यह पंद्राह द्रव्य जमा करना शम्भो के स्नान वास्ते) पानीयान्तरितैः पयोदधिघृतैः क्षौद्रेक्षुभिः सौषधैर्व्रीह्यद्भिः कुसुमोदकैः फलजलैः सिद्धार्थलाजोदकैः। गन्धाद्भिः शुभहेमरत्नसलिलैरित्थं सदा चोत्तमैर्दद्यात्पञ्चदशाम्बुना सह महास्नानानि शम्भोः क्रमात् ॥ (स्नान देना) असंख्याताः सहस्राणि ये रुद्रा अधिभूम्याम् । तेषां सहस्रयोजनेऽवधन्वानि तन्मसि ॥ १ ॥ येऽस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । तेषां स० ॥ २ ॥ ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपाश्रिताः। तेषां स० ॥ ३ ॥ ये नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । तेषां स० ॥ ४ ॥ ये वनेषु शिल्पिञ्जरा नीलग्रीवा विलोहिताः । तेषां सह० ॥ ५ ॥ येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषां स० ॥ ६ ॥ ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषां० ॥ ७ ॥ ये भूतानां पथि रक्षय ऐड मृडाय व्युधः। तेषां० ॥ ८ ॥ ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः । तेषां० ॥ ९ ॥ य एतावन्तो वा भूयांसो वा दिशो रुद्रा वितिष्ठिरे । तेषां० ॥ १० ॥ ॐनमो अस्तु रुद्रेभ्यो, ये दिवि येषां वर्षमिषवस्तेभ्यो, दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा-

स्तेभ्यो नमो अस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १ ॥ ॐनमो अस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवस्तेभ्यो दश प्राची० ॥ २ ॥ ॐनमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यो दश० ॥ ३ ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ॥ भवाय देवाय ८ पार्वतीसहिताय परमेश्वराय पञ्चदश स्नानानि नमः ॥ (गणेश को चतुर्दश स्नान) गणानान्त्वा गणपतिं हवामहे कविङ्कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः सीद सादनम् ॥ विनायकाय ८ वल्लभासहिताय श्रीमहागणेशाय चतुर्दश स्नानानि नमः ॥ (अब जल क्षीर दही घी खण्ड तिल जऊं शहद लाजा पञ्चगव्य गन्ध फूल और सर्वौषधी यह तेराह द्रव्य सूर्यस्नान के लिये जमा करना) पयः क्षीरं दधि सर्पिरिक्षुस्तिला यवा मधु । लाजामृतं पञ्चगव्यं गन्धपुष्पौषधीस्तथा । त्रयोदशस्नानेऽमूनि सूर्यस्योक्तानि सूरिभिः (सूरजको स्नान देना) चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्राद्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥ ह्रां ह्रीं सः सूर्याय ८ प्रभासहिताय आदित्याय त्रयोदश स्नानानि नमः ॥ (अब लाजा गन्ध वच कुठ ऐल शङ्खफूल केसर अगुरु और कर्पूर यह आठ द्रव्य दुर्गा के स्नान पर एकठा करना, "गन्ध, केसर" ये दो गिनती में एक ही रख के आठ द्रव्य है ॥) लाजागन्धवचः कुष्ठं वालुकं शङ्खपुष्पकम् । कुङ्कमागुरुकर्पूरं स्नाने देव्याः प्रकल्पयेत् ॥ (स्नान

देना) जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः। स नः पर्षदतिदुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥ भगवत्यै अमायै ८ सहस्रनाम्न्यै देव्यै भवान्यै अष्टौ स्नानानि नमः॥ (शङ्खको स्नान) अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः। तमीमहे महागयम्॥ पाञ्चजन्याय शङ्खाय स्नानं नमः॥ (घण्टा को स्नान) कयानश्चित्र आभुवदूती सदा वृधः सखा। कया शचिष्ठया वृता॥ देवदूत्यै घण्टाभगवत्यै स्नानं नमः॥ (अत्र यथाकाल सन्ध्योपासना का "ब्रह्म तृप्यतां" इह तर्पण करके) ततो देवर्षिपितृतर्पणम्॥ ॐ नमो देवेभ्यः "कण्ठोपवीती" स्वाहा ऋषिभ्यः "अपसव्येन" स्वधा पितृभ्यः "सव्येन" आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरं। जगत्तृप्यतु तृप्यतु तृप्यतु एवमस्तु॥ (सफा पानी से मन्त्रगुडक करना, याने स्नानद्रव्यों की गलाजत हठना)। तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम्॥ भगवते वासुदेवाय ८। भवाय देवाय ८ विनायकाय ह्रां ह्रीं सः सूर्याय ८ भगवत्यै अमात्यै ८ सहस्रनाम्न्यै देव्यै भवान्यै विष्णुपञ्चायतनदेवताभ्यः मन्त्रगुडकं परिकल्पयामि नमः॥ (बाहे हाथ के वीच में अक्षत व पानी रख के उससे देवों की नीराजना "याने" आलत निकाल के बाहे कन्दे पर से फैंकना) ॐ प्रत्यग्ने हरसाहरः शृणीहि विश्वतः प्रति। यातुधानस्य रक्षसो बलं विरुज वीर्यम्॥ (इत्यारात्रिका॥ (अब देवों के पैरो का पानी आंखों पर मलना) ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः।

अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि ॥ इति नेत्रस्पर्शनम् ॥ (अब पानी तिलक गोमतीचक्र शङ्ख तुलसीदल घण्टा सालिग्रामशिला और ताम्रपात्र, यह आठ वस्तु चरणामृते के अङ्ग हैं। याने यथायोग्य ताम्रपात्र में गोमतीचक्र व सालिग्राम, चन्दनतिलक और तुलसीफूलयुक्त रख के, और विष्टरयुक्त शंख में पानी रखना) ॥ उदकं चन्दनं चक्रं शङ्खश्च तुलसीदलम्। घण्टा शिला ताम्रपत्रमष्टाङ्गं चरणामृतम् ॥ (अब घण्टाशब्द समेत शङ्ख से पानी डालना) ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम् ॥ भगवते वासुदेवाय ८ लक्ष्मीसहिताय नारायणाय चरणामृतं गृह्णामि नमः॥ (सिरको छिडकना) शिरसा धारयाम्यहम् ॥ आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयते हनः। उशतीरिव मातरः ॥ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥ (विच्छाने जगाह फूल विच्छाना) आसनाय नमः पद्मासनाय नमः गरुडासनाय नमः वृषभास० मूषकास० सप्ताश्वास० सिंहासनाय नमः शतदलपद्मा० सहस्रदलपद्मासनाय नमः ॥ (विच्छौने पर मार्जित देवों को गन्ध फूल से अनुलेपन कर के विठाना) किमासनं ते गरुडासनाय किं भूषणं कौस्तुभभूषणाय। लक्ष्मीकलत्राय किमस्ति देयं वागीश किं ते वचनीयमस्ति ॥ (यथाकाल स्तोत्र पढ के) रथे अक्षेषु वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे। इन्द्रं या देवी सुभगा जजान सेयम-

गाद्दर्चसा संविदाना । विष्णुपञ्चायतनदेवताभ्योऽनुलेपनं गृह्णामि नमः ॥ (वस्त्र पहनना) तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ युवा सुवासाः परिवीत आगात्स उच्छ्रेयान्भवति जायमानः । तन्धीरासः कवय उन्नयन्ति साध्यो मनसा देवयन्तः ॥ विष्णुपञ्चायतनदेवताभ्यो वस्त्रं नमः ॥ (जनू पहनना) तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्य त्वा उपवीतेन उपनह्यामि ॥ विष्णुपञ्चायतनदेवताभ्यः यज्ञोपवीतं नमः ॥ (गन्ध चडाना) तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ भगवते वासुदेवाय० विष्णुपञ्चायतनदेवताभ्यः समालभनं गन्धो नमः ॥ (अक्षत व फूल चडाना) तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ पुष्पवतीः प्रसुवतीः फलिनीरफला वत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ "पूर्वे" नारायणाय नमः "दक्षिणे" पुण्डरीकाक्षायाय नमः "पश्चिमे" गोविन्दाय नमः "उत्तरे" मधुसूदनाय नमः "ऐशान्यां" विष्णवे नमः "आग्नेय्यां" जनार्दनाय नमः "नैर्ऋत्यां" पद्मनाभाय नमः "वायव्यां" वामनाय नमः ऊर्ध्वे" वासुदेवाय नमः "अधरे" लोकनाथाय नमः "मध्ये" केशवाय

नमः शङ्खाय नमः चक्राय नमः गदायै हलाय कौस्तुभाय नमः जयाय विजयाय धात्र्यै शेषाय अयनद्वयाय "द्वारे" चण्डाय उपचण्डाय ऋग्वेदाय यजुर्वेदाय सामवेदाय अथर्ववेदाय नमः कृतयुगाय त्रेतायुगाय द्वापरयुगाय कलियुगाय ॐ भूर्लोकाय ॐ भुवः लोकाय ॐ स्वर्लोकाय ॐ भूर्भुवः स्वर्लोकाय नमः ॐ तद्विष्णोः० भगवते वासुदेवाय ८ लक्ष्मीसहिताय नारायणाय नमः ॥ ॐ यो रुद्रो० भवायदेवाय नमः पार्वतीसहिताय परमेश्वराय नमः । ॐ गणानान्त्वा० विनायकाय नमः वल्लभासहिताय महागणेशाय नमः । ॐ चित्रन्देवानां० ह्रांह्रींसः सूर्याय नमः ८ प्रभासहिताय आदित्याय नमः । ॐजातवेदसे० भगवत्यै अमायै नमः कामायै नमः सहस्रनाम्न्यै देव्यै भवान्यै नमः विष्णुपञ्चायतनदेवताभ्यः अर्घो नमः ॥ पुष्पंनमः (धूप चढाना) यत्पुरुषं विदधुः कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू का ऊरू पादा उच्यते ॥ धूरसि धूर्व धूर्वन्तं योस्मान्धूर्वति तं धूर्वय वयं धूर्वामस्तं च धूर्व । देवानामसि वह्नितमं सस्नितमं पप्रितमं इष्टतमं विष्णोः क्रमोस्याहुतमसि हविर्दानं दृंहस्व स्वाहान्मित्रस्य त्वा चक्षुषा प्रेक्ष उरुत्वा वाताय । वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाङ्गिरस्वत् । रुद्रास्त्वा धूपयन्तु, त्रैष्टुभेन छन्दसाङ्गिरस्वत्, आदित्यास्त्वा धूपयन्तु जागतेन छन्दसाङ्गिरत्वत्, विश्वे त्वा देवा वैश्वानरा धूपयन्तु आनुष्टुभेन छन्दसाङ्गिरस्वत्, इन्द्रस्त्वा धूपयतु, वरुणस्त्वा धूपयतु, विष्णुस्त्वा धूपयतु ॥ विष्णुपञ्चायतनदेवताभ्यः धूपं परिकल्पयामि नमः ॥ (रत्नदीप चढाना) ब्राह्मणोस्य मुखमासीद्बाहू

राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ तेजोसि शुक्रमसि ज्योतिरसि धामासि प्रियन्देवानामना दृष्टं देवयजनं देवताभ्यस्त्वा देवताभ्यो गृह्णामि देवेभ्यस्त्वा यज्ञेभ्यो गृह्णामि॥ विष्णुपञ्चायतनदेवताभ्यः रत्नदीपं परिकल्पयामि नमः॥ (चामर करना) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादधे॥ जय नारायण० शिवयोर्लीलास्तुतिं पठित्वा विष्णुपञ्चायतनदेवताभ्यः चामरं परिकल्पयामि नमः॥ (छत्री चढाना) काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥ विष्णुपञ्चायतनदेवताभ्यः छत्रं परिकल्पयामि नमः॥ (आईना दिखाना) तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतम्। विष्णुपञ्चायतनदेवताभ्यः आदर्शं परिकल्पयामि नमः॥ (तर्पण करना) एताभ्यो देवताभ्यो धूपो नमः दीपो नमः॥ (माफी मांगना हाथ जुड के) विष्णुपञ्चायतनदेवतानामर्घ्यदानाद्यर्चनविधिः सर्वः परिपूर्णोस्तु॥ (त्रामपात्र में दूध घी शकर दही शहद जमा करके मधुपर्क चडाना) चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ विष्णुपञ्चायतनदेवताभ्यः मात्रामधुपर्कं चारुं निवेदयामि नमः॥ (पुष्पाञ्जलि सिर पर चडाना) नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयत्॥ विष्णुपञ्चायतनदेवताभ्यः कुसु-

प्ाञ्जलिं समर्पयामि नमः ॥ (चार प्रक्रम देना) सप्तास्यास-
न्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तान्वना अबध्न-
न्पुरुषं पशुम् ॥ ॐ नमो नारायणाय भगवन्प्रसीद ॥ ॥ इति
चत्वारि प्रदक्षिणानि ॥ ॥ ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्था-
स्पदं शिवविरिञ्चिनुतं शरण्यम् । भृत्यार्तिहं प्रणतपाल भवा-
ब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम् ॥ १ ॥ त्यक्त्वा
सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादर-
ण्यम् । मायामृगं दयितयेप्सितमनुधावद्वन्दे म० ॥ २ ॥ श्री-
मत्सरोरुहयवाङ्कुशचक्रचापमत्स्याङ्कितं नवविलोहितपल्लवाभम्।
लक्ष्म्यालयं परममङ्गलमात्मरूपं वन्दे० ॥ ३ ॥ वृन्दावनान्त-
रमगादनु गोकुलानां सञ्चार्य सर्वपशुभिः स्वविवृद्धिकामी ।
सञ्चिन्तयदगगुरोर्मृगपक्षिणां यद्वन्दे० ॥४॥ यद्गोपिका विरह-
जाग्निपरीतदेहास्तप्तस्तनेषु विजहुः परिरभ्य तापम् । रासे तदी-
यकुचकुङ्कुमपङ्कलिप्तं वन्दे० ॥ ५ ॥ कालीयमस्तकविघट्टनद-
क्षमस्य मोक्षेप्सुभिर्विरहदीनमुखाभिरारात् । तत्पत्निभिः स्तुतम-
शेषनिकामरूपं वन्दे० ॥ ६ ॥ ज्ञानालयं श्रुतिविमृग्यमनादि-
मर्च्यं ब्रह्मादिभिर्हृदि विचिन्त्यमगाधबोधैः । संसारकूपपतितो-
त्तरणावलम्बं वन्दे० ॥ ७ ॥ येनाङ्कपालवपुषः स्तनपानबुद्धे-
स्त्वलदङ्घ्रिणाहतमऽनो विपरीतचक्रम् । विध्वस्तभाण्डमपतद्धुवि-
गोपमूर्तेर्वन्दे महापुरुष ते चरणारविन्दम् ॥८॥ इत्यष्टकं पठति
यः परमस्य पुंसो नारायणस्य निरयार्णवतारणस्य । सर्वासि-
माशु हृदये कुरुते मनुष्यः संप्राप्य देहविलयं लभते च मोक्षम्
॥ ९ ॥ (अष्टाङ्गप्रणाम देना) उभाभ्यां जानुभ्यां पाणिभ्यां

शिरसा उरसा वचसा मनसा नमस्कारं करोमि नमः ॥ (तर्पण पानीसे करना। याने किसी तराह हीनता की माफी मांगकर पूर्णता मांगना) अन्नं नमः अन्नं नमः, आज्यमाज्यं अद्यदिने अद्य यथासङ्कल्पात्सिद्धिरस्तु अन्नहीनं क्रियाहीनं विधिहीनं द्रव्य-हीनं मन्त्रहीनं च यद्गतं तत्सर्वमच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ (अर्घा का पानी हाथ से वापस करना) शन्नो देवीरभिष्टय आपो भवन्तु पीतये, शंय्योरभिस्रवन्तु नः ॥ (उस से अपोशान देना) विष्णुपञ्चायतनदेवताभ्यः अपोशानं नमः आचमनीयं नमः ॥ (और भी उलटाई हुई अर्घा के पानी में यथासम्भव दक्षिणा पाना) पुनः, शन्नो देवी० । (दक्षिणा देना) विष्णुप-ञ्चायतनदेवताभ्यः दक्षिणायै तिलहिरण्यरजतनिष्क्रयं ददानि। (और भी पैसा कुछ देना) एता देवताः सदक्षिणान्नेन प्रीयन्तां प्रीताः सन्तु ॥ (नैवेद्य निवाजना) अमृतीशमुद्रयाऽमृतीकृत्य, अमृतमस्तु अमृतायतां नैवेद्यम् ॥ सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादधे भगवते वासुदेवाय ८ लक्ष्मीसहिताय नारायणाय, भवाय देवाय ८ पार्वतीसहिताय परमेश्वराय, विनायकाय ८ वल्लभा-सहिताय श्रीमहागणेशाय, ह्रांह्रींसः सूर्याय, सप्ताश्वाय ८ प्रभासहिताय आदित्याय, भगवत्यै अमायै ८ सहस्रनाम्न्यै देव्यै भवान्यै विष्णुपञ्चायतनदेवताभ्यः ॐ नमो नैवेद्यं निवेदयामि नमः ॥ (योगिनियों को बल देना) आकाशमा-तृभ्यो बलिं नमः, समालभनं गन्धो नमः, अर्घो नमः, पुष्पं नमः, (देवों को बल देना) विष्णुपञ्चायतनदेवताभ्यः बलिं

समर्पयामि नमः (क्षेत्रपालों को बल देना) क्षां क्षेत्राधिपतयेऽन्नं नमः । रां राष्ट्राधिपतयेऽन्नं नमः ॥ सर्वाभयवरप्रद मयि पुष्टिं पुष्टिपतिर्दधातु ॥ (दो फूल देवों को चडाना) ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ १ ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ २ ॥ (इहां नित्यकर्म जप वगैरा करके, देवों को विसर्जन करना, याने अक्षत दो दर्भकाण्ड हाथमें रख के रुक्सत करना) ततो जपादि कृत्वा ॥ ॐ भूः पुरुषं विसर्जयामि नमः, ॐ भुवः पुरुषं विसर्जयामि नमः, ॐ स्वः पुरुषं विसर्जयामि नमः ॐ भूर्भुवः स्वः पुरुषं विसर्जयामि नमः॥ ३ ॥ ॐ भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात् ॥ ३ ॥ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ ३ ॥ वासुदेवाय विद्महे लक्ष्मीनारायणाय धीमहि, तन्नो विष्णुः प्रचोदयात् ॥ ३ ॥ जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ॥ ३ ॥ ॐ नमः कारणवामनाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ३ ॥ विश्वरूपाय विद्महे विष्वक्सेनाय धीमहि, तन्नो विष्णुः प्रचोदयात् ॥ ३ ॥ नरसिंहाय विद्महे नरकोत्तारणाय धीमहि, तन्नो विष्णुः प्रचोदयात् ॥ ३ ॥ ॐ तत्पुरुषाय विद्महे महादेवायधीमहि, तन्नोरुद्रः प्रचोदयात् ॥ ३ ॥ ॐ तत्पुरुषायविद्महे वक्रतुण्डाय धीमहि, तन्नो दन्ती प्रचोदयात् ॥ ३ ॥ भास्कराय विद्महे

सहस्ररश्मये धीमहि, तन्नः सूर्यः प्रचोदयात् ॥ २ ॥ सुभगायै विद्महे काममालिन्यै धीमहि, तन्नो दुर्गा प्रचोदयात् ॥ ३ ॥ ॐ तत्सद्ब्रह्माऽद्य तावत्तिथावद्य अमुकमासस्य अमुकपक्षस्य तिथावमुकायां, भगवतः वासुदेवस्य ८ लक्ष्मीसहितस्य नारायणस्य, भवस्य देवस्य ८ पार्वतीसहितस्य, परमेश्वरस्य, विनायकस्य ८ वल्लभासहितस्य श्रीमहागणेशस्य, ह्रां ह्रींसः सूर्यस्य८ प्रभासहितस्य आदित्यस्य, भगवत्याः अमायाः ८ सहस्रनाम्न्याः देव्याः भवान्याः विष्णुपञ्चायतनदेवतानां, आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं श्रीविष्णुप्रीत्यर्थं विष्णुपञ्चायतनपूजनमच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ (यवा समेत पानी से तर्पण करना) एताभ्यो देवताभ्यः यवोदकं नम उदकतर्पणं नमः ॥ (प्रार्थना करना) आज्ञा मे दीयतां नाथ नैवेद्यस्यास्य भक्षणे । शरीरयात्रासिद्ध्यर्थं भगवन्क्षन्तुमर्हसि ॥ आपन्नोसि शरण्योसि सर्वावस्थासु सर्वदा । भगवंस्त्वां प्रपन्नोस्मि रक्ष मां शरणागतम् ॥ २ ॥ ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः । केयूरवान्कनककुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ यद्बाल्ये यच्च कौमारे यद्यौवने कृतं मया । वयःपरिणतौ यच्च यच्च जन्मान्तरेषु च । कर्मणा मनसा वाचा यत्पापं समुपार्जितम् । तन्नारायण गोविन्द क्षमस्व गरुडध्वज । नीलोत्पलदलश्यामः प्रफुल्लजलजेक्षणः । जलशायी जगद्योनिः प्रीयतां मम केशवः ॥ भक्तिः कृष्णे मतिर्धर्मे शक्तिस्त्यागे रतिः श्रुतौ । दया सर्वेषु भूतेषु स्यान्मे जन्मनि जन्मनि ॥ देव प्रपन्नार्तिहर प्रसादं कुरु केशव ।

अवलोकनदानेन भूयो मा दा भवव्यथाम् ॥ हा नाथ हा रमानाथ व्रजनाथार्थिनाशन । मग्नमुद्धर गोविन्द मां दीनं सङ्कटार्णवात् ॥ (शिवजी को) आकर्णयाशु कृपणस्य वचांसि सम्यक् लब्धोसि नाथ बहुभिर्ननु जन्मवृन्दैः ॥ अद्य प्रभो यदि दयां कुरुषे न मे त्वं त्वत्तः परं कथय कं शरणं व्रजामि ॥ नमः शिवाय निःशेषक्लेशप्रशमशालिने । त्रिगुणग्रन्थिदुर्भेदभवबन्धविभेदिने ॥ (गणेशको) वक्रतुण्ड महाकाय कोटिसूर्यसम प्रभो । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ सर्गारम्भेप्यजाताय बीजरूपेण तिष्ठते । धात्रा कृतप्रणामाय गणाधिपतये नमः ॥ (सूरजको) जातवेद्प्रकाशाय ज्योतीरूप सनातन । सप्ताश्वरथवाहाय भास्कराय नमो नमः ॥ अपरः शरणं नास्ति त्वमेव शरणं मम । तस्माच्छरण्यभावेन रक्षरक्ष दिवाकर ॥ (दुर्गाको) शब्दब्रह्ममये स्वच्छे देवि त्रिपुरसुन्दरि । यथाशक्ति जपं पूजां गृहाण परमेश्वरि ॥ दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि । दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय दयार्द्रचित्ता ॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्गतम् । मया दासेन विज्ञप्तं क्षम्यतां परमेश्वर ॥ (अष्टाङ्ग प्रणामदेना) उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा उरसा वचसा मनसा च नमस्कारं करोमि नमः ॥ (तर्पण करना) नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते कृणोमि । इत्येतासामेव देवतानां सार्ष्टितां सायुज्यं सलोकतां सामीप्यमाप्नोति य एवं विद्वान् स्वाध्यायमधीते ॥ (माफी मांगना) यज्ञेन यज्ञमय-

जन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ (चरणामृत भागियों को देना) बलिर्विभीषणो भीष्मः प्रह्लादो नारदः शुकः । षडेते वैष्णवश्रेष्ठा गृह्णन्तु चरणोदकम् ॥ ॐनमोदेवेभ्यः "कण्ठोपावीती" स्वाहा ऋषिभ्यः "अपसव्येन" स्वधा पितृभ्यः "सव्येन" आ ब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरं जगत्तृप्यतु तृप्यतु तृप्यतु एवमस्तु ॥ (और फूल चडाना) पाद्यं किं भवते भवेत्सुरसरित्पादोदकाय प्रभो को दीपस्तरणीक्षणाय गरुडारूढाय किंचासनम् । किं भोज्यं जगदन्नदाय वसनं किं दिव्यवासोभृते किं स्तोत्रं निगमागमाय तदलं बद्धो मयैकाञ्जलिः ॥ (विज्ञप्ति करना) पूजितोसि मया भक्त्या भगवन्कमलापते । सलक्ष्मीको मम स्वान्तं विश विश्रान्तिहेतवे ॥ (चरणामृत हाथसे पीना) चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूता अतिपात्मानमरातिं तरेम । लोकस्य द्वारमर्चिष्मत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधातु ॥ ॥ देवदेव महादेव शङ्खचक्रगदाधर । देहि विष्णो! ममानुज्ञां पादोदकनिषेवणे ॥ अकालमृत्युहरणं सर्वव्याधिनिवारणम् । विष्णुपादोदकं पीत्वा पुनर्जन्म न विद्यते ॥ अच्युतानन्त! गोविन्द नामोच्चारणभेषजात् । नश्यंति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ शरीरे जर्जरीभूते व्याधिग्रस्ते कलेवरे । औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः ॥ ॥ इति विष्णुपञ्चायतनपूजाविधिः ॥

अथ गणेशकवचम् ॥

अस्य श्रीगणेशकवचस्य भृगुऋषिः, अनुष्टुप्छन्दः, श्रीगजवदनो देवता, आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं, अमुककामनासिद्ध्यर्थे जपे पाठे वा विनियोगः ॥ ॥ अथ ध्यानम् ॥ गजवदनमचिन्त्यं तीक्ष्णदन्तं त्रिनेत्रं बृहदुदरमशेषव्यक्तिरूपं पुराणम् । अमरवरसुपूज्यं रक्तवर्णं सुरेशं पशुपतिसुतमीशं विघ्नराजं नमामि ॥ ॥ ॐ शिरोवत्वीशपुत्रो मे बालं पातु विनायकः । त्रिनेत्रः पातु नेत्रे मे शूर्पकर्णस्तथा श्रुती ॥ हेरंवो रक्षतु घ्राणं मुखं पातु गजाननः । जिह्वां पातु गणेशो मे कण्ठं श्रीकण्ठवल्लभः ॥ स्कन्दौ महावलः पातु भुजौ मे पातु विघ्नहा । करौ परशुभृत्पातु नाभिं सिन्दूरभूषितः ॥ जघनं पार्वतीपुत्रस्तूरू मे पातु पाशभृत् । जानुनी जगतां नाथो जङ्घे मूषकवाहनः ॥ गुल्फौ पद्मासनः पातु पादौ दुर्दैत्यदर्पहा । एकदन्तोऽग्रतः पातु पृष्ठं पातु गणाधिपः ॥ पार्श्वौ तु मोदकाहारो दिग्विदिक्षु च सिद्धिदः । व्रजतस्तिष्ठतो वापि जाग्रतः स्वपतोपि वा ॥ चतुर्थीवल्लभो देवो पातु मे भुक्तिमुक्तिदः ॥ इदं पवित्रं यः स्तोत्रं चतुर्थ्यां नियतः पठेत् । सिन्दूररक्तपुष्पैश्च दूर्वयाऽऽपूज्य विघ्नपम् ॥ राजा राजसुतो वापि राजपत्नी कुलं बलम् । तस्यावश्यं भवेद्वश्यो विघ्नराजप्रसादतः ॥ समन्त्रयन्त्रं यः स्तोत्रं करे संलिख्य धारयेत् । धनधान्यसमृद्धिस्तु भवत्येव न संशयः ॥ वाग्भवं कामराजस्य माया चादौ विधीयताम् । हुंनमो वक्रतुण्डाय मध्ये यस्य जपेन्नरः ॥ रसनालसदेकाग्रं षडङ्गं रसपूर्वकम् । हुत्वा दत्वा च विधिवन्नष्टद्रव्यं समे-

ष्यति ॥ यं यं काममभिध्याय कुरुते कर्म किञ्चन । तं तं सर्वमवाप्नोति वक्रतुण्डप्रसादतः ॥ भवेदव्याहतैश्वर्यः स गणेशप्रसादतः ॥ इति श्रीभविष्यत्पुराणे गणेशकवचं समाप्तम् ॥

अथ गुरुस्तुतिः ॥

ॐब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् । एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ १ ॥ सारं सारं जनिमृतिभयं जातनिर्वेदवृत्तिर्ध्यायं ध्यायं पशुपतिमुमाकान्तमन्तर्निषण्णम् । पायं पायं सपदि परमानन्दपीयूषधारा भूयोभूयो निजगुरुपदाम्भोजयुग्मं नमामि ॥ २ ॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ ३ ॥ नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् । शिरसा योगपीठस्थं धर्मकामार्थसिद्धये ॥ ४ ॥ श्रीगुरुं परमानन्दं वन्दाम्यानन्दविग्रहम् । यस्य सान्निध्यमात्रेण चिदानन्दायते परम् ॥ ५ ॥ अखण्डमण्डलाकारं व्याप्तं येन चराचरम् । तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ६ ॥ अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ७ ॥ हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन । सर्वदेवस्वरूपाय तस्मै श्रीगुरवे नमः ॥ ८ ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः । गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ॥ ९ ॥ ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् । ज्ञानमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥ १० ॥ नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।

विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ॥ ११ ॥ नवाय नव-
रूपाय परमार्थैकरूपिणे । सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते
॥ १२ ॥ स्वतन्त्राय दयाक्लृप्तविग्रहाय परात्मने । परतन्त्राय
भक्तानां भव्यानां भव्यहेतवे ॥ १३ ॥ ज्ञानिनां ज्ञानरूपाय
प्रकाशाय प्रकाशिनाम् । विवेकिनां विवेकाय विमर्शाय विम-
र्शिनाम् ॥ १४ ॥ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ।
सदा मच्चित्तरूपेण विधेहि भवदासनम् ॥१५॥ इति गुरुस्तुतिः ॥

अथ महागायत्रीलीलास्तुतिः ॥

ॐसदा गवेषयन् जगत्त्रयेषु वेदमातरं चिदात्मना कृत-
स्थितं समत्र चाद्य लब्धवान् । उदस्तु गद्गदं महोदयात्प्र-
णौमि भक्तिनौकया सुदुस्तरं द्रुतं तितीर्षुरापदर्णवम् ॥ १ ॥
सुदीनलोकपातिनी सतां कृपाऽतिशोभते ह्यतः सुधांशुचक्षुषे-
क्षयाम्ब ! मादृशं जनम् । नवापि हीयते तवेषदीशि ! पालनेन
नो भवाद्यतः कुपुत्रता न भासते प्रसूहृदि ॥२॥ नमामि मुक्त-
विद्रुमप्रतप्तहाटकाऽसितावदातवर्णसुन्दरैः षडर्धलोललोचनैः ।
सरोजषण्डबान्धवप्रतप्तपावकप्रभैः किरीटरत्नरञ्जितैः सुधांशुख-
ण्डमण्डितैः ॥३॥ मुखैर्दशार्धसंमितैर्विराजमानविग्रहां सुरेशचा-
पसप्रभां समस्तदेववन्दिताम् । वराभयाङ्कुशान्वितैः कपालशूल-
शंखचक्रसारसद्वयीगुणाङ्कितैः करैर्विराजिताम् ॥४॥ भवद्रुमस्य
मूलतां गतां मुनीन्द्रवन्दितामखण्डभावमण्डलप्रकाशकारिणीं
शिवाम् । समस्तदेवतामयीं समस्तसिद्धिदायिनीमपूर्वरूपविग्रहां
सरस्वतीं भवार्तिहाम् ॥ ५ ॥ शुचीन्दुसूर्यलोचनां शुचीन्दुसू-

र्यविग्रहां शुचीन्दुसूर्यसङ्गमस्वभावशालिनीं शुभाम् । पदद्वयानुकम्पितस्वशक्तिचक्रसेवितां परेशशक्तिमुत्तमां भजे त्रिलोकसुन्दरीम् ॥ ६ ॥ महामहेश्वरी जगद्विसर्गसुस्थितिक्षयस्वतन्त्रता शरीरिणी बभूव या महेशितुः । द्विषत्रितादिभेदतो लतायमानविग्रहा त्रयीश्वरी सदा तु सा जगज्जयाय जायताम् ॥ ७ ॥ नमामि तन्मुखारविन्दपञ्चकं मलापहं गलैकनालकं सदाविकासि भक्तिसम्भवम् । स्वभक्तहंससेवितं शुचीन्दुपद्मबन्धवः प्रतीकभूतविग्रहा गता हि यत्र पञ्चताम् ॥ ८ ॥ भवार्णवेऽतिदुःसहस्मराधिदिग्धमानसं पडूर्मिनित्यपीडितं जनं दिधीर्षुमानसा । श्रुतिध्वनिस्फुरन्मुखारविन्दभूसुरैः सदा त्रिसन्ध्यमीश्वरी नुताऽस्तु सा सुखप्रदा हि नः ॥ ९ ॥ त्रयीप्रसूः स्वदृष्टिपातधूतभक्तकल्मषा समैर्जनैर्नुता मुदा स्ववर्णधर्मभेदतः । निलिम्पनिम्नगामिषेण पादधौतजं जलं यदीयमागतं क्षितिं तनोतु नः शिवं तु सा ॥ १० ॥ स्वदम्भवञ्चिताखिलं कुभोगसक्तमानसं सदाऽशुचिं कुमार्गगं शठं च शङ्कसे यदि । कथं स्वपादचिन्तनोत्थवैभवं नहीश्वरि ! यतोङ्घ्रिचिन्तकं दयादृशेक्षसे न मादृशम् ॥ ११ ॥ अनेकदोषदूषितेष्वनिर्विवेचना सती स्वतन्त्रशक्तिरीश्वरी भवाघनाशकारिणी । कृपामयीं दृशं विधाय सा स्वभक्तिपात्रितं स्वपत्कजे मधुव्रतं करोतु मामहर्निशम् ॥ १२ ॥ त्रिसन्ध्यमिष्टदैवतं सुकेशवास्यजं स्तवं स्मरन् हृदीद्धभावनो विधाय वेदमातरम् । विधूय पापसंचयं वितीर्य कीर्तिमुत्तमामिह त्वमुत्र कैवलं पदं स याति निर्भयम् ॥ १३ ॥

इति श्रीमहागायत्रीलीलास्तुतिः ॥

अथ गौरीस्तुतिः ॥

ॐ लीलारब्धस्थापितलुप्ताखिललोकां लोकातीतैर्योगिभिरन्तर्हृदि मृग्याम् । बालादित्यश्रेणिसमानद्युतिपुञ्जां गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ १ ॥ आशापाशक्लेशविनाशं विदधानां पादाम्भोजध्यानपराणां पुरुषाणाम् । ईशीमीशाङ्गार्धहरां तां तनुमध्यां गौरीमम्बा० ॥ २ ॥ प्रत्याहारध्यानसमाधिस्थितिभाजां नित्यं चित्ते निर्वृतिकाष्ठां कलयन्तीम् । सत्यज्ञानानन्दमयीं तां तडिदाभां गौरी० ॥ ३ ॥ चन्द्रापीडानन्दितमन्दस्मितवक्त्रां चन्द्रापीडालङ्कृतलोलालकभाराम् । इन्द्रोपेन्द्राद्यर्चितपादाम्बुजयुग्मां गौरी० ॥ ४ ॥ नानाकारैः शक्तिकदम्बैर्भुवनानि व्याप्य स्वैरं क्रीडति यासौ स्वयमेका । कल्याणीं तां कल्पलतामानतिभाजां गौरी० ॥५॥ मूलाधारादुत्थितवन्तीं विधिरन्ध्रं सौरं चान्द्रं धाम विहाय ज्वलिताङ्गीम् । स्थूलां सूक्ष्मां सूक्ष्मतरां तामभिवन्द्यां गौरी० ॥ ६ ॥ आदिक्षान्तामक्षरमूर्त्या विलसन्तीं भूते भूते भूतकदम्बं प्रसवित्रीम् । शब्दब्रह्मानन्दमयीं तामभिरामां गौरी० ॥ ७ ॥ यस्याः कुक्षौ लीनमखण्डं जगदण्डं भूयो भूयः प्रादुरभूदक्षतमेव । भर्त्रा सार्धं तां स्फटिकाद्रौ विहरन्तीं गौरी० ॥ ८ ॥ यस्यामेतत्प्रोतमशेषं मणिमाला सूत्रे यद्वत्क्वापि चरं चाप्यचरं च । तामध्यात्मज्ञानपदव्या गमनीयां गौरी० ॥ ९ ॥ नित्यः सत्यो निष्कल एको जगदीशः साक्षी यस्याः सर्गविधौ संहरणे च । विश्वत्राणक्रीडनशीलां शिवपत्नीं गौरीम० ॥ १० ॥ प्रातःकाले भावविशुद्धिं विदधानो भक्त्या नित्यं जल्पति

गौरीदशकं यः । वाचां सिद्धिं सम्पत्तिमुच्चैः शिवभक्तिं तस्यावश्यं पर्वतपुत्री विदधाति ॥ ११ ॥ इति गौरीस्तुतिः ॥

अथ मुकुन्दमालास्तुतिः ॥

ॐवन्दे मुकुन्दमरविन्ददलायताक्षं कुन्देन्दुशङ्खदशनं शिशुगोपवेशम् । इन्द्रादिदेवगणवन्दितपादपीठं वृन्दावनालयमहं वसुदेवसूनुम् ॥ १ ॥ श्रीवल्लभेति वरदेति दयापरेति भक्तप्रियेति भवलुण्ठनकोविदेति । नाथेति नागशयनेति जगन्निवासेत्यालापिनं प्रतिदिनं कुरु मां मुकुन्द ॥ २ ॥ जयतु जयतु देवो देवकीनन्दनोयं जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः । जयतु जयतु मेघश्यामलः कोमलाङ्गो जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ ३ ॥ मुकुन्द मूर्ध्ना प्रणिपत्य याचे भवन्तमेकान्तमियन्तमर्थम् । अविस्मृतिस्त्वच्चरणारविन्दे भवेभवे मेस्तु भवत्प्रसादात् ॥ ४ ॥ श्रीमुकुन्दपदाम्भोजमधुनः परमाद्भुतम् । यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥ ५ ॥ नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः कुम्भीपाकं गुरुमपि हरे तारकं नापनेतुम् । रम्यारामामृदुतनुलतानन्दने नापि रन्तुं भावेभावे हृदयभवने भावयेयं भवन्तम् ॥ ६ ॥ नास्था धर्मे न वसुनिचये नैव कामोपभोगे यद्यद्भव्यं भवतु भगवन्पूर्वकर्मानुरूपम् । एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेपि त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥ ७ ॥ दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम् । अवधीरितशारदारविन्दौ चरणौ ते मरणेपि चिन्तयामि ॥ ८ ॥

सरसिजनयने सशङ्खचक्रे मुरभिदि मा विरमेह चित्त रन्तुम् । सुखतरमपरं न जातु जाने हरिचरणस्मरणामृतेन तुल्यम् ॥९॥ माभैर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातना नामी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः । आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ १० ॥ भवजलधिमगाधं दुस्तरं निस्तरेयं कथमहमिति चेतो मास्मगाः कातरत्वम् । सरसिजदृशि देवे तावकी भक्तिरेका नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥ ११ ॥ तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले दारावर्ते तनयसहजग्राहसङ्घाकुले च । संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन् पादाम्भोजे वरद भवतो भक्तिनावं प्रसीद ॥१२॥ पृथ्वी रेणुरणुः पयांसि कणिकाः फल्गुः स्फुलिङ्गो लघुस्तेजो निःश्वसनं मरुत्तनुतरं रन्ध्रं सुसूक्ष्मं नभः । क्षुद्रा रुद्रपितामहप्रभृतयः कीटाः समस्ताः सुरा दृष्टे यत्र स तावको विजयते भूमावधूतावधिः ॥ १३ ॥ आम्नायाभ्यसितान्यरण्यरुदितं कृच्छ्रव्रतान्यन्वहं मेघच्छेदफलानि पूर्वविधयः सर्वं हुतं भस्मनि । तीर्थानामवगाहनानि च गजस्नानं विना यत्पदद्वन्द्वाम्भोरुहसंस्तुतिं विजयते देवः स नारायणः ॥ १४ ॥ भवजलधिगतानां द्वन्द्ववाताहतानां सुतदुहितृकलत्रत्राणभारावृतानाम् । विषमविषयतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥१५॥ रजसि निपतितानां मोहजालावृतानां जननमरणधूलीदुर्गतिं सङ्गतानाम् । शरणमशरणानामेक एवातुराणां कुशलपथि नियोक्ता चक्रपाणिर्नराणाम् ॥ १६ ॥ अपराधसहस्रसङ्कुलं

पतितं भीमभवार्णवोदरे । अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥ १७ ॥ यच्चिन्तितं च मनसा वचसा यदुक्तं चक्षुःकरश्रवणपादविचेष्टितं च । यद्यन्निशासु दिवसेषु कृतं मयैव तत्तज्जनार्दन तवार्चनमेव भूयात् ॥ १८ ॥ मा मे स्त्रीत्वं मा च मे दासभावो मा मूर्खत्वं मा कुदेशेषु जन्म । मिथ्यादृष्टिर्मा च मे स्यात्कदाचिज्जातौ जातौ विष्णुभक्तो भवामि ॥ १९ ॥ आनन्द गोविन्द मुकुन्द राम नारायणानन्त निरामयेति । वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनानि मोक्षे ॥ २० ॥ क्षीरसागरतरङ्गशीकरासारतारकितचारुमूर्तये । भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ॥ २१ ॥ क्षीरसारमपनीय शङ्कया स्वीकृतं यदि पलायनं त्वया । मानसे मम नितान्ततामसे नन्दनन्दन कुतो न लीयसे ॥ २२ ॥ वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणादौदार्यादघशोषणादगणितश्रेयःपदप्रापणात् । सेव्यः श्रीपतिरेव सर्वजगतामेकान्ततः साक्षिणः प्रह्लादश्च विभीषणश्च करिराट्पाञ्चाल्यहल्या ध्रुवः ॥ २३ ॥ नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा सेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति । यं कंचित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥ २४ ॥ हे लोकाः ! शृणुत प्रसूतिमरणव्याधेश्चिकित्सामिमां योगज्ञाः समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः । अन्तर्ज्योतिरमेयमेकममृतं कृष्णाख्यमापीयतां तत्पीतं परमौषधं वितनुते निर्वाणमात्यंतिकम् ॥२५॥ बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः कण्ठेन स्वरगद्गदेन

नयनोद्गीर्णेन बाष्पाम्बुना । नित्यं त्वच्चरणारविन्दयुगलध्यानामृतास्वादिनामस्माकं सरसीरुहाक्ष ! सततं सम्पद्यतां जीवितम् ॥ २६ ॥ तत्त्वं ब्रुवाणानि परं परस्मादहो क्षरन्तीव सुधां पदानि । आवर्तय प्राञ्जलिरस्मि जिह्वे नामानि नारायणगोचराणि ॥ २७ ॥ इदं शरीरं परिणामपेशलं पतत्यवश्यं श्लथसन्धिजर्जरम् । किमौषधैः क्लिश्यसि मूढ दुर्मते ! निरामयं कृष्णरसायनं पिब ॥ २८ ॥ श्रीमन्नाम प्रोच्य नारायणाख्यं के न प्राप्ता वाञ्छितं पापिनोपि । हा नः पूर्वं वाक्प्रवृत्ता न तस्मिंस्तेन प्राप्तं गर्भवासादिदुःखम् ॥ २९ ॥ माद्राक्षं क्षीणपुण्यान् क्षणमपि भवतो भक्तिहीनान्पदाब्जे माश्रौषं श्राव्यबद्धं तव चरितमपास्यान्यदाख्यानजातम् । मास्प्राक्षं माधव त्वामपि भुवनपतिं चेतसापह्नवानं माभूवं त्वत्सपर्याव्यतिकररहितो जन्मजन्मान्तरेपि ॥ ३० ॥ मदन परिहर स्थितिं मदीये मनसि मुकुन्दपदारविन्दधाम्नि । हरनयनकृशानुना कृशोसि स्मरसि न चक्रपराक्रमं मुरारे ॥ ३१ ॥ दारा वाराकरवरसुता तेऽङ्गजोयं विरिञ्चिः स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः । मुक्तिर्मध्ये जगदविकलं तावकी देवकीयं माता मित्रं बलरिपुसुतस्तत्त्वतोन्यन्न जाने ॥ ३२ ॥ जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं पाणिद्वन्द्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु । कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन्नमाधोक्षजम् ॥ ३३ ॥ यत्कृष्णप्रणिपातधूलिधवलं तद्वै शिरः स्याच्छुभं ते नेत्रे तमसोज्झिते सुरुचिरे याभ्यां हरिर्दृश्यते । सा बुद्धिर्नियमै-

र्यमैश्च विमला या माधवध्यायिनी सा जिह्वामृतवर्षिणी प्रतिपदं या स्तौति नारायणम् ॥ ३४ ॥ भक्तद्वेषभुजङ्गगारुडमणिस्त्रैलोक्यरक्षामणिर्गोपीलोचनचातकाम्बुदमणिः सौन्दर्यमुद्रामणिः । श्रीकान्तामणि-रुक्मिणीघनकुचद्वन्द्वैकभूषामणिः श्रेयो ध्येयशिखामणिर्दिशतु नो गोपालचूडामणिः ॥ ३५ ॥ शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्यसम्पूज्यमन्त्रं संसारोत्तारमन्त्रं समुदिततमसां सङ्गनिर्याणमन्त्रम् । सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसन्दष्टसन्त्राणमन्त्रं जिह्वे श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम् ॥ ३६ ॥ व्यामोहोद्दलनौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं दैत्यानर्थकरौषधं त्रिभुवने सञ्जीवनैकौषधम् । भक्तार्त्तिप्रशमौषधं भवभयप्रध्वंसिदिव्यौषधं श्रेयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णनामौषधम् ॥ ३७ ॥ आश्चर्यमेतद्धि मनुष्यलोके सुधां परित्यज्य विषं पिबन्ति । नामानि नारायणगोचराणि त्यक्तान्यवाचः कुहकाः पठन्ति ॥ ३८ ॥ लाटी नेत्रपुटी पयोधरघटी क्रीडाकुटी दोस्तटी पाटीरद्रुमवर्णनेन कविभिर्मूढैर्दिनं नीयते । गोविन्देति जनार्दनेति जगतांनाथेति कृष्णेति च व्याहारैः समयस्तदेकमनसां पुंसां परिक्रामति ॥ ३९ ॥ अयाच्यमक्रेयमयातयामम्ऽयाच्यमऽक्षय्यमदुर्भरं मे । अस्त्येव पाथेयमतिप्रयाणे श्रीकृष्णनामामृतभागधेयम् ॥ ४० ॥ यस्य प्रियौ श्रुतिधरौ रविलोकगीतौ मित्रे द्विजन्मपरिवारशिवावभूताम् । तेनाम्बुजाक्ष चरणाम्बुजषट्पदेन राज्ञा कृता स्तुतिरियं कुलशेखरेण ॥ ४ ॥

इति श्रीकुलशेखरराज्ञा कृता मुकुन्दमालास्तुतिः ॥

समाप्तमिदं पुस्तकम् ॥

शिवमहिम्नस्तोत्र । १६-१८ शिवचामरार्थं, जयस्तुति । १७-१० अभिनवगु-
प्तस्तुति । १८-७ अतिभीषणस्तुति । १८-२० पञ्चाक्षरषडक्षरस्तुति । २०-१
शिवनिर्वाणस्तुति । २२-३६ शिवक्षमापनस्तुति । २४-२२ दीनाक्रन्दस्तोत्र ।
२७-६ कैवल्योपनिषत् । २६-१२ शिवपूजा । ३८-११ गणेशस्तवराज ।=)

९ गणेशस्तोत्रावली । (४६-१ गणेशस्तोत्र । ५३-१४ गणेशलीलास्तुति
५४-१७ विनायकाष्टक । ५५-१४ गणपतिविद्या । ६३-१ देवीध्यानरत्नमाला
७९-१७ शारिकास्तोत्र । ८०-१३ ब्राह्मीविद्या ।) ।)

१० पञ्चस्तवीसमेता-सौन्दर्यलहरी ८१-१ पञ्चस्तवी ९९-१ सौन्दर्यलहरी ।)

११ बटुकपूजा । ११३-१ कलशस्थापन । १२६-१३ पूजाविधि । १५१-१९
व्याहृति । १६२-१६ वैश्वदेव । १७६-१ वागुरद्वादशीपूजा । ।-)

१२ देवीपूजा । १७७-१ दुर्गापूजा १८८-१ राज्ञीस्तोत्रं (याद्वादशार्कं) २६४-१४
रूपभवानीवाक्यमञ्जरी । २०८-१ सरस्वतीस्तुति । ।)

१३ भक्तिविवेकसार (पञ्चमंखण्डं) १-१ अज्ञानबोधिनी २८-१ आत्मबोध ३६-
१ प्रह्लादस्तुति सटी० ५६-१ मुचुकुन्दस्तुतिसटीक ६१-१ रासक्रीडा पंचाध्या-
यीसटीक ७३-१ कृष्णान्वेषण ८२-१ गोपीस्तुति ८८-१ गोपीसान्त्वन ९३-
९ क्रीडातात्पर्यं १०३-१ गोपीयुगलगीता ११० ९ अमरगीता सटी १२१-१
भिक्षुगीता सटी १३५-१ महागणपतिस्तोत्र १३७-१० शैवी प्रातः कृत्य १४७-
१२ महागायत्रीस्तुति १४९-१४ मुकुन्दमाला १५५-१४ कृष्णलीलास्तुति १५६
-१७ गोविन्दाष्टक १५८-११ विष्णुजयस्तुति १५९-८ भजगोविन्दस्तुति १६१
-९ रासस्तुति १६३-५ विचारपंजरस्तोत्र १६४-१७ कृष्णजन्मस्तुति १६५-१०
नारायणार्तत्राणस्तोत्र १६७-१७ नारायणोपनिषत् १६९-१८ शैवीब्राह्मीविद्या
१७२-१ शिवस्तुति १७४-१ जटायुस्तुति १७५-१२ त्रिपुरास्तुति १७६-२०
शारिकास्तुति १७७-१८ ज्वालास्तुति १७९-६ राज्ञीस्तुति १८०-५ सूर्यस्तुति
१८२-१० चन्द्रस्तुति । १८३-५ भौमस्तुति । १८४-७ बुधस्तुति । १८५-१
बृहस्पतिस्तुति । १८६-८ शुक्रस्तुति । १८७ ७ शनिस्तुति । १९३-१ राहुस्तुति
१९४-१ केतुस्तुति । १९६-१ पराप्रवेशिकात्मकः ॥=)

१४ उपदेशपञ्चकम् । (पहुंखण्ड) रत्नप्रभाटीकायुतं १-१ =)

१५ बृहत्स्तोत्ररत्नाकर (ऊपर लिखे हुई तेराह पुस्तकों का विषय वाला) २॥)

१६ नित्यकर्मविधि नं०, १ [स्नानविधि-सन्ध्या-नैवेद्यमन्त्र-भोजनविधि-पञ्चगव्यविधि "हिन्दी में इति कर्तव्यतासहित व्याख्याविता च] ≡)

१७ भवानीसहस्रनाम । इन्द्राक्षीयुतं -)

१८ रुद्रपञ्चकम् (रुद्रमन्त्र-चममन्त्र-सौभाग्य-दीक्षा शताध्यायात्मकम्) ।)

१९ कर्मकाण्डपुस्तकं नं०, १ (सांवत्सरिकपितृक्रियोपयोगि) ॥=)

२० कर्मकाण्डपुस्तकं नं०, २ (नं १ के विषय, तथा साष्टकश्राद्ध-गायत्र्या श्राद्धा--पूयमानश्रा-पावमानीश्र-रुचिस्तव-कूष्माण्डमन्त्रादिविषयैरलङ्कृतं विस्तीर्णतया स्फुटं कलशरेखागुम्फितं च) १।)

२१ कर्मकाण्डपुस्तकं नं०, ३ (कलशार्चनादियुत वैश्वदेव-व्याहृति पञ्चयाग पुरश्चर्यादिकर्मानुष्ठानविधि-देवताजपविधानाद्यात्मकम्) ॥)

२२ कर्मकाण्डपुस्तकं । नं०, ४ (साङ्गोपाङ्गविष्णुबालविधान-तथा कलशादियुत शैवीक्रियात्मकं च) अतीवोपयोगि संपूर्ण २।) (१खण्ड) १।) (२खंड १।)

२३ वेदकल्पद्रुमः नं० १ (हवनोपयोगि, तथा चातुर्मास्योद्यापनमूलगण्डान्तशान्ति-ग्रहशान्ति-अभिषेकमन्त्र-कलशग्रहयोरुत्पत्तिस्थापनविधिश्च ग्रह-बालविधानं समापन शंकुप्रतिष्ठा-वेश्मप्रतिष्ठा पंचगव्य-तुलादान कन्यासंस्कारात्मकः) १।=)

२४ वेदकल्पद्रुमः नं० २ उद्यापनोपयोगिगोप्रदानादियुतः उद्यापनयुतः २)

२५ मेखलापुस्तकं । (सूचक-विवाह उपनयन (चतुर्विंशतिसंस्कारात्मक) अग्निकुण्डपूजा-कन्यासंस्कार-नान्दीमुखश्राद्ध-इहकोलिपूजात्मकं) १)

२६ पार्थिवेश्वरपूजा (कलशस्थापनवैश्वदेव-व्याहृत्यादियुता) ।=)

२७ योगवासिष्ठसारः (मूलमात्रं) =)

२८ कलशस्थापनोद्धार (देवपितृक्रिययोरतीवोपयोगि) -)

२९ काश्मीरिकज्योतिषसंग्रहः (मुहूर्तावलोकन-वर्षपत्र-जन्मपत्रयूपयोगी) ॥)

३० कुमारसहस्रनाम (नामावलीयुक्तं) ≡

३१ कपालमोचनश्राद्धविधि (द्विग्रामे बालकमोक्षकारकः -)

३२ नम्बरों २, ३, ४, ६, २६, के विषय वाला सहस्रनामाष्टकाली १॥≈